CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्र
द्धा
ञ्ज
लिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पद्मप्रसादश्रद्धाञ्जलिः

संस्कृत अध्ययन संस्थान
त्रिभुवन विश्वविद्यालय
काठमाडौं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकाशकम्–
संस्कृताध्ययनसंस्थानम्
(वाल्मीकि क्याम्पस)

प्रथमं संस्करणम् १,००० प्रति

२०३१

मुद्रकः
लुष प्रेस
पुल्चोक, ललितपुर ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिवङ्गतेभ्यः प्रकाण्डपाण्डित्यमण्डितविद्वद्धुरीणेभ्यः सदाचा-
रसंरक्षणैकव्रतेभ्यो नव्यन्यायाचार्यन्यायरत्नाद्यनेकविधो-
पाधिविभूषितेभ्यः शास्त्रीयनिर्णयप्रदानविचक्षणेभ्यः
लोकोत्तरप्रतिभाविभासितमतिभ्यः संस्कृतजगद-
साधारणविभूतिभ्यः सुरभारतीसंरक्षणसम-
र्पितजीवनेभ्यो ऽनवरताध्ययनाध्यापननिर-
तेभ्यः नेपालराजकीयसंस्कृतमहाविद्या-
लये समलङ्कृतप्रधानाचार्यपदेभ्यः
आदर्शविपश्चिदग्रेसरेभ्यः भट्ट-
राईत्युपाह्वश्रीपद्मप्रसाद-
शर्मभ्यः समुपहृतः

श्रद्धाञ्जलिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्री पं. पद्मप्रसादशर्मा भट्टराई

जन्म - वि. सं. १९५३ वैशाखशुदि १२
स्वर्गवासः - वि. सं. २०३० माघवदि १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पण्डितप्रवर-श्रीपद्मप्रसादशर्ममहाभागानां

जन्मकुण्डली



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीः

श्रीवल्लभराम शालिग्राम साङ्गवेदविद्यालयीय २९ गणेशोत्सवशास्त्रार्थसभापतीनां पण्डितप्रवर श्रीपद्मप्रसादन्यायाचार्य-महोदयानां विद्वद्भिः सबहुमानं कृतमभिनन्दनपत्रम् ।।

ये श्रीसद्गुरुसम्प्रदायमतुलं संसेव्य संपाद्य या
स्वान्तः सन्तमसान्तकारिगुणया विद्योतिता विद्यया
तेषां सम्प्रति सम्प्रतीतविदुषां मध्ये यशो मध्यगो
न्यायाचार्य ! हृदा वृतः परिषदध्यक्षो भवान् वीक्ष्यते ।।१।।
कामं सन्तु विदां सदस्सु बहुधा सङ्ख्यातसंख्याः परं
सद्विद्वान् विनयेन शोभत इति श्रीमत्युदीक्ष्यं वचः
विद्यावद्विनयेन विद्म गुणिनां पद्मप्रसादाभिधां
न्यायेनोभयलक्षणेन गुणिनां मान्योऽभवद्भूषिताम् ।।२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्यां संसदि सन्निधाय भवता विद्वद्भिरभ्यर्थित
यत्कार्यं कृतमत्र केवलमिमे सर्वेऽधमर्णा वयम्
अन्तःसारमथापदार्थविधुरं भावत्कवैदुष्यमि-
त्युल्लासो वृणुते स्वयं तु भवते सन्न्यायरत्नं पदम् ॥३॥

गोलोकन्यायरत्नेषु विरलेष्वदवीयसी ।
न्यायरत्नेति पदवी भवन्तमभिवर्धयेत् ॥४॥

भाद्रशुक्ल ९ सोमवासरे सं. २००८

श्री राजेश्वरशास्त्री द्राविडः	रामाचार्यः
अनन्तशास्त्री फड्के	के. वि. नीलमेघाचार्यः
काशीनाथशास्त्री	काशीरामशर्मा
विश्वनाथपाण्डेयः	रामनाथशास्त्री ज्योतिषाचार्यः
दुर्गादत्तवैद्यः	पं. श्यामराजमिश्रो वैद्यः
नीलकण्ठजोशी	रघुनाथप्रसादः शुक्लः
हरिरामशुक्लः	गोपीनाथशास्त्री मण्डलीकरः
गणेशदीक्षितः	जयराम शा. शु.
मुकुन्दशास्त्री	विश्वनाथदातारः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्थानस्य वक्तव्यम्

गुरुभिरभिहितनामधेयानां, पुण्यश्लोकानां, गुरुवराणां श्रीपद्मप्रसादभट्टराईमहोदयानां स्मरणमपि वाग्देव्याः सरस्वत्याः प्रसादकं भवतीत्यस्माकं संस्कृतविद्यार्थिनां विश्वासः। तत्र भवन्तः स्वकीयैरनन्यसाधारणैर्वैदुष्य–वैदग्ध्य–वैचक्षण्यैः स्वदेशजान्, परदेशजांश्च, विबुधांश्चमत्कृतवन्तः। संस्कृत-शिक्षणस्य संरक्षणे, संवर्धने, संप्रसारणे च सदा दत्तचित्ताः, सर्वदा मननशीलाः, सततं निदिध्यासनमग्ना, अनवरतं प्रयतमानाः भट्टराईमहोदया अनुरोधिनां, विरोधिनां च श्रद्धेयाः समादरणीयाश्चासन्। तत्रभवतां परोक्षं ये केचन यथातथा कथयेयुर्नाम, परं समक्षं न कोऽपि प्राभवत् संस्कृतस्य विषये प्रतिकूलं कथयितुं, सङ्केतयितुं वा। तत्रभवन्तः संस्कृतस्यैव कृते प्रादुरभवन्, संस्कृतस्यैव कृते अजीवन्, संस्कृतस्यैव कृते नैकेषु शास्त्रेषु धुरन्धराणां शिष्यप्रशिष्याणां परम्परां प्राचालयन्। एतस्यामेव महनीयायां परम्परायामहमपि अन्यतमः शिष्यः अन्यतमः प्रशिष्यश्चेत्यन्तर्मुदं गौरवं चावहे।

वयं नैपालकाः स्वकीयायां संस्कृतावात्मसम्मानमाव-हामः; तस्या एव संरक्षणेन, संवर्द्धनेन च संरक्षिताः संवर्द्धिताश्च भवाम इत्यस्माकमैकान्तिको विश्वासः। अस्माकं नैपालिकायाः संस्कृतेर्मूलभूतायामापूरायां चार्यसंस्कृतौ (राजमानानां) शाहवंश्यानां श्री ५ महाराजाधिराजानां समुज्ज्वलायां परम्परायां प्रकाशमानाः संस्कृतिसंरक्षकाः श्री ५ महाराजाधिराजा वीरेन्द्र-वीरविक्रमशाहदेवाः राष्ट्रियविकासाय बद्धपरिकराः सुशिक्षामेव राष्ट्रविकासस्य परमं साधनं मन्यन्ते। तदर्थं राष्ट्रिय–शिक्षा-पद्धतेर्योजनायाः सुचारुसंचालने सर्वोच्चं नेतृत्वं वितरन्तो विद्यन्ते। राष्ट्रनायकानां तत्रभवतां श्री ५ महाराजाधिरा–जानां कुलपतित्वे उच्चशिक्षासञ्चालनस्य परममुत्तरदायित्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वहंस्त्रिभुवनविश्वविद्यालयः संस्कृतस्य संरक्षणे संवर्धने च कर्तव्यरतो वर्तते । तस्यैव विश्वविद्यालयस्यान्यतमो निकायः संस्कृताध्ययनसंस्थानं संस्कृतशिक्षायाः सर्वतोमुखस्य विकासस्य योजनां योजयत्, कार्यं च विदधत् प्राणपणेन प्रयतमानमस्ति । समेषां संस्कृतविद्यार्थिनां संस्कृतानुरागिणां च यथायोग्यं साहाय्यमप्युपलभ्यमानमस्ति । तथापि 'ये नाम केचिदिह नः प्रथयन्त्यवज्ञां जानन्ति ते किमपी' ति महाकवेः भवभूतेरुक्तिमनुसरन्तोऽप्यधुनाऽप्यस्माकं प्रयत्नेन तेषामपि लक्ष्यीकृतत्वात् 'तान् प्रति नैष यत्नः' इति तु वयं नानुवदामः । श्रीपद्मप्रसाद भट्टराईमहोदयसदृशस्य व्यक्तित्वस्य ऐकान्तिक्या आवश्यकतायाः समये करालो महाव्याधिः पक्षाघातस्तत्रभवतां भौतिकं पिण्डमसमर्थमकरोत्, पुनर्निष्ठुरः कालस्तमपि पिण्डं कवलीकृतवान् । परन्तु तत्रभवतां कालजयीयशोदेहोऽस्मान् प्रेरयन्, प्रोत्साहयंश्चास्ते । एतत् प्रकाशनं भौतिकस्य तस्यैव यशोदेहस्यैकं परिचायकम् । अस्मिन् पावने प्रयत्ने सहयोगदानावसरलाभेन संस्कृताध्ययन संस्थानमात्मानं किञ्चित् कृतार्थं मन्यते । अस्मिन् कार्ये सहयुक्तान्, गुरुवरान्, सतीर्थ्यमहोदयान्, मित्रवरान्, चिरजीविनः शिष्यान्, प्रशिष्यान्, अन्यांश्च सर्वान् महानुभावान् धन्यान् वदामः । अस्मिन् कार्ये वयं कुत्रचन यदि त्रुटिताः, तास्त्रुटयः ज्ञानस्य, सामर्थ्यस्य वा न्यूनतया प्रयोजिता इति विज्ञा अस्मानमवश्यं क्षमायाः, आवश्यकाय संस्काराय परामर्शस्य च प्रदानेनानुग्रहीष्यन्तीत्यस्माकं महती आशा, दृढो विश्वासश्च वर्तते ।

२०३१ वैक्रमाब्दस्य **पण्डितः अम्बिकाप्रसादः अधिकारी**

अधिक भाद्र पूर्णिमा । अध्यक्षः (डीनः)

बेलक्कुण्डी, संस्कृताध्ययनसंस्थानस्य,

दाङ प्रदेशस्य, त्रिभुवनविश्वविद्यालयीयस्य,

राप्तयन्चलस्य,

नेपालाधिराज्यस्य ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषय–सूची

१. आर्षी पद्यमाला — प्रा. श्री ऋषिराम पोखरेलः (वाल्मीकि क्याम्पस, सं. अ. सं) १

२. संस्मरणम् — प्रा. श्रीखेमराज उपाध्यायः (केशवशरणः) ९

३. श्रद्धाञ्जलिः प्रा. श्रीगिरिधारी भट्टराई ११

४. " — प्रा. श्री गोपालनिधि तिवारी १३

५. अस्माकं द्वन्द्वसहिष्णुता — श्री नायब बडागुरुज्यू प्रा. श्रीजुननाथ पण्डितः १५

६. हरे शिव ! प्रा. श्रीटीकाराम अधिकारी १६

७. गुरोर्वन्दना — प्रा श्रीतोयनाथ पाण्डेयः १७ सहायकडीन. संस्कृताध्ययनसंस्थान वाल्मीकि क्याम्पस

८. विद्वत्पूजा — प्रा. श्रीनयराजः पन्तः २०

९. पान्थनिवृत्तिः — श्रीपूर्णप्रसादः (ब्राह्मणः) २२ भू. पू. प्रमुख आयुक्त, निर्वाचन आयोग

१०. पद्यपञ्चकम् — प्रा. श्रीबदरीनाथ भट्टराई २४

११. अशोच्यः श्रीपद्मप्रसादः — श्रीबुद्धिसागरः पराजुलिः २५ प्रमुख अनुसन्धान अधिकारी नेपाल राष्ट्रिय अभिलेखालय;

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१२. श्रद्धाञ्जलिपञ्चकम्	—	प्रा. श्रीमाधवप्रसाद देवकोटा:	२७
१३. श्रद्धाञ्जलि:	—	प्रा. श्रीरामचन्द्र: पौडेल:	२८
१४. पद्मस्मृति:	—	भू. पू. प्रधानाचार्य श्रीरामनाथ आचार्य:	३१
१५. श्रद्धाञ्जलि:	—	प्रा. श्रीलोकनाथ ढकाल:	३३
१६. श्रद्धाप्रसूनम्	—	प्रा. श्रीविष्णुराजशर्मा आत्रेय:	५४
१७. श्रद्धाञ्जलि:	—	प्रा. श्रीविश्वनाथ: पोखरेल:	५६
१८. परिदेवनवेदनम्	—	प्रा. श्रीशेषराजशर्मा	५७
१९. श्रद्धाञ्जलि:	—	प्रा. श्रीसिद्धिनाथ गौतम:	५९
२०. विद्वत्स्मृति:	—	स्व. प्रा. श्रीहरिनाथ ढुङ्गेल:	६३
२१. पद्मस्मृति:	—	योगी नरहरिनाथ:	६७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पद्मप्रसादश्रद्धाञ्जलिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आर्षो पद्मसाला

प्रा. ऋषिराम पोखरेल
वाल्मीकि क्याम्पस
[त्रि. वि. सं. अ. सं.]

विश्वप्रसिद्धं यस्यास्ति गगनस्पर्शनोत्सुकम् ।
सागराख्यं हिमशिरो गौरीशङ्करसंश्रितम् ।।

।।१।।

तस्य नेपालदेशस्य पशुपत्याश्रयस्य हि ।
प्रवृद्धगुरुमाहात्म्यः प्रसङ्गोऽत्र प्रकाश्यते ।।

।।२।।

पूर्वस्यां वर्तते रम्यं रामेछापाख्यमण्डलम् ।
शालुग्रामाभिधस्तत्र ग्रामोऽस्ति जनकाञ्चले ।

।।३।।

ब्राह्मणानां श्रोत्रियाणां याज्ञिकानां समन्ततः ।।
वर्तते वसतिस्तत्र ऋषीणामाश्रमो यथा ।

।।४।।

तत्रैवास्ते ब्रह्मवंशदण्डः पद्माश्रयान्वितः ।।
श्रीकान्ततेजः सम्पृक्त–दिननाथप्रभान्वितः ।

।।५।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृष्णमायाप्रसूतात्मा पद्मगर्भो यथा पुरा ।।
पद्मनाभ–प्रभावेण पद्मः प्रादुर्बभूव ह ।

।।६।।

रामबाणाङ्कभूगम्ये वैक्रमे श्रीहरेस्तिथौ ।
सिते राधे वसन्ते ऽसौ प्रसूतः कृष्णमायया ।।

।।७।।

विकसत्पद्मसङ्काशवदनं वीक्ष्य तं शिशुम् ।
पद्मप्रसाद इत्यस्या ऽन्वर्थाञ्चक्रे ऽभिधां पिता ।।

।।८।।

शैशवे ऽभ्यस्तविद्यो ऽसौ विनयादिगुणान्वितः ।
सतीर्थ्यान् समतिक्रम्य प्रोत्फुल्लपद्मवद् बभौ ।।

।।९।।

यथाविध्युपनीतो ऽसौ गुरुसेवापरायणः
शिक्षां प्राथमिकीं लब्ध्वा ब्रह्मवृत्तिं समाश्रितः ।।

।।१०।।

तदायं प्रथमं प्राप्तश्छात्रावासं सुसंस्कृतम्
राजपुष्करिणीतीरे प्रधाने पाठसद्मनि ।

।।११।।

अधीत्य मध्यमां दित्सुर्विश्वनाथपुरीं ययौ
मध्यमां व्याकृतेर्दत्वा न्यायमध्येतुमुत्सुकः ।

।।१२।।

वामाचरणतर्केन्दोर्लक्ष्मणद्राविडाह्वयात्
नित्यानन्दाद् गुरोश्चैव स्वाध्यायं स्वमपूरयत् ।

।।१३।।

प्रथमं नव्यन्याये ऽसावाचार्यः प्रथमो ऽभवत् ।
धर्मशास्त्रे च वेदान्ते ऽद्वितीयो विदुषां वरः ।।

।।१४।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पद्मो वैशेषिकाचार्यः पोष्टाचार्यत्वमीयिवान् ।
तदेवं सर्वशास्त्रज्ञः शास्त्रार्थकुशलः सुधीः ।।

।।१५।।

पदवाक्यप्रमाणेषु धर्मशास्त्रोदधिष्वपि ।
यदस्ति साररत्नञ्च पद्मः सर्वं समासदत् ।।

।।१६।।

तर्कैः प्रमाणैः शास्त्रीयैर्विवादैश्च सभास्वसौ ।
ऊहापोहेषु कुशलः बुधान् सभ्यांश्च तोषयन् ।।

।।१७।।

अकरोन्नयपालस्य यशोन्वर्थं जयान्वितम् ।
ततः काश्यां मारवाडीमहाविद्यालयस्य सः ।

।।१८।।

प्रधानाचार्यतां सम्यगलञ्चक्रे सभाजितः ।।
तदुत्तरं च गोयन्का–महाविद्यालयङ्गतः ।।

।।१९।।

प्राध्यापकत्वं संप्राप्तोऽध्यापयन् न्यायदिग्गजः ।
न्यायाध्यक्षश्च सन्यासिमहाविद्यालयस्य सः ।।

।।२०।।

गुणलोभात् कृतः सद्भिर्गुणलुब्धा हि साधवः ।
तस्यैतस्य सरस्वत्याः सुतस्य गीःपतेर्यथा ।।

।।२१।।

सभ्यैर्वाराणसीसंस्थैर्न्यायरत्नपदावलीम् ।
सपर्यात्वे समर्प्यापि तृप्तिर्नैवान्वभूयत ।

।।२२।।

तदेवं भारते ख्यातिं शास्त्रार्थविजितं यशः ।
प्राप्यापि नातिहृष्टोऽसावाधमर्ण्यं व्यपोहितुम् ।।

।।२३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्यायपद्मः स्वदेशस्य सेवायां स्वं मनोऽदधात् ।
तदैव नयपालस्य भूभुजा सम्प्रचोदितः ॥

॥२४॥

नवाभ्रशून्यनेत्राब्दे(२००९वि.सं.)स्वदेशं स समासदत् ।
नेपाले राजकीयाख्यो महाविद्यालयोऽजनि ॥

॥२५॥

उपप्रधानाचार्यत्वे तत्रासौ भूभुजा कृतः ।
प्रभाते शीतले शान्ते स्वान्ते न्यायस्य पाठनम् ॥

॥२६॥

सर्वथोचितमित्युक्त्वा तथा शिष्यानपाठयत् ।
प्रातः षड्वादनादेत्य यावद्दिनमथान्वहम् ॥

॥२७॥

पाठयित्वा स्वयं पक्त्वा रात्रावेव कृताशनः ।
तथापि तस्य विदुषो मुखश्रीरधिकं बभौ ॥

॥२८॥

न लक्षिता ग्लानिरपि वाङ्मनःकायकर्मसु ।
न्यायद्वयं सप्रपञ्चं वेदान्ताद्यन्यदर्शनम् ॥

॥२९॥

धर्मशास्त्रं व्याकरणं साहित्यञ्च सलक्षणम् ।
स ग्रन्थिभेदं साद्यन्तं पाठयन् धर्ममास्थितः ॥

॥३०॥

पद्मप्रसादः शुद्धात्मा नीत्वा षष्टयधिकं वयः ।
प्रधानाचार्यस्तत्राभूद् गुरुशिष्यैः समादृतः ॥

॥३१॥

वाराणसीं निवसता विश्वनाथकृपाजुषा ।
वल्लर्यमरभारत्योर्गद्यपद्यान्यनेकशः ॥

॥३२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शास्त्रप्रबन्धसन्तानास्तेनिरे तेन सूरिणा ।
सभ्यो गीर्वाणवाग्वर्धिन्याः सभायाः विशेषतः ।।

।।३३।।

विद्याधर्मप्रचारिण्या समित्या बहुमानितः ।
अध्यक्षत्वे ततानासौ वाचस्पत्यं यशो भुवि ।।

।।३४।।

भारतीयाऽखिलमहाविद्वत्सम्मेलनादिके ।
स्वदेशात् प्रहितः सोऽभूत् प्रातिनिध्येन कर्मणा ।।

।।३५।।

नेपालान्तःपातिषु च धर्मरक्षासभादिषु ।
पञ्चाङ्गव्रतपर्वादि–निर्णेतृ–मण्डलादिषु ।।

।।३६।।

सभागोष्ठीषु शिक्षाया नैकासु समितिष्वपि ।
साभापत्यं विशिष्टत्वं सदस्यत्वञ्च सोऽकरोत् ।।

।।३७।।

नेपालराजसमितेः स्थायिन्या जीवनावधिम् ।
सदस्यत्वे वृतः सोऽभूद् राज्ञा सम्मानपूर्वकम् ।।

।।३८।।

विश्वविद्यालयस्योऽयं कलासंकायमुख्यताम् ।
विभागाध्यक्षताञ्चक्रे संस्कृतस्य विशेषतः ।।

।।३९।।

गोरखादक्षिणवाह्वाख्य–प्रशस्तिं यशोन्विताम् ।
समर्प्य भू-महेन्द्रेण सोऽयमासीत् पुरस्कृतः ।।

।।४०।।

गजेन्दुव्योमपक्षाब्दे (२०१८वि.सं.) वैक्रमे लोकविप्लवम् ।
दूरीकर्तुं वृतो लोकैर्द्रष्ट्याचार्यतां श्रितः ।।

।।४१।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुनश्च लोककल्याणं विधित्सुर्लोकवल्लभः ।
भूपो महेन्द्रस्तं वव्रे प्रधानाचार्यमृत्विजाम् ॥

॥४२॥

रुद्रेष्टयां वैक्रमाब्दस्य पक्षाक्ष्यभ्राक्षिसंमिते (२०२२ वि. सं.)
प्रसिद्धे पशुपक्षेत्रे रुद्रागारेश्वरान्तिके ॥

॥४३॥

स पद्मः पद्मगर्भस्य शासनाल्लोककिल्बिषम् ।
स्वयं दधार तेनासौ पक्षाघातेन यन्त्रितः ॥

॥४४॥

विधिना विहितं नित्यं महद्भिरपि पाल्यते ।
ततः पद्मः कियत्कालं शम्भोर्ध्यानपरायणः ॥

॥४५॥

सुदारुणं पक्षवातं धृत्वा वामशरीरतः ।
राज्ञा लोकैश्च सत्कार्यस्मृत्यानित्यं हि सत्कृतः ॥

॥४६॥

पद्मोऽशान्तात्पक्षवातात् त्यक्तासनपरिग्रहः ।
त्रिसप्ताहं तपस्तप्त्वा स्वर्यातो वीतकल्मषः ॥

॥४७॥

तत् किं स औषधं कर्तुं गतः स्ववैद्यसन्निधौ ।
किं वा शास्त्रार्थकुशलो वाक्पतिं जेतुमुद्गतः ॥

॥४८॥

विष्णोर्वा करसंस्पर्शानन्दाकृष्टः पुनर्गतः ।
यद्वाऽत्रत्यं पापजातं भुवो भारायितं तमः ॥

॥४९॥

समाहरन् न्यायपद्मो रविणा स्पर्धितुं गतः ।
अथवा पद्मगर्भस्य शासनं पालयन् हृदा ॥

॥५०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राप्य पद्मो भूसुरत्वं सुरत्वं पुनरेयिवान् ।
अथवा पद्मवासिन्या आश्रयत्वं पुनर्गतः ॥

॥५१॥

मानसे मानसो हंसो यथा तत्र श्रितो नु किम् ।
यद्वा तद्वास्तु विधिना वञ्चिता स्मोऽधुना वयम् ॥

॥५२॥

त्वयि पद्मे गते प्रज्ञां दृष्ट्वा खिन्नां निराश्रयाम् ।
अथवाऽलोकपद्मस्त्वं पद्मलोकमितो गतः ॥

॥५३॥

अस्माकञ्च पुनर्लोकं कुर्याः पद्माञ्चितं गुरोः ।
अथ पद्म स्वर्गतोऽसि स्वेच्छया वा परेच्छया ॥

॥५४॥

स्वेच्छयैवेत्यप्रतीतिः स्नेहभाजो वयं यतः ।
सर्वस्यापि सुता दाराः स्मृता हि प्रेमभाजनम् ॥

॥५५॥

भवानत्र प्रमाणं नः प्रयच्छतु यदुत्तरम् ।
रामादयः सुता धर्मपत्नी पुत्र्यस्तथा वयम् ॥

॥५६॥

विस्मृता भवता पद्म कथं विश्वासभूमयः ।
तस्मात् परेच्छया प्राप्तः परं धामेति निश्चितम् ॥

॥५७॥

मत्वा वयमनाथाश्च परेच्छां तां विरुन्ध्महे ।
प्रसादं गुरुपद्मस्य स्मारं स्मारं समे वयम् ॥

॥५८॥

विषीदामो वियोगेन पद्मस्तेन प्रसीदतु ।
पद्मप्रियापद्यमाला छन्दसानुष्टुभा युता ॥

॥५९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रीतये भवतां भूयादिति संप्रार्थयन् मुहुः ।
देव पद्म ! तवानृण्यं विधातुमयमुत्सुकः ।।

।।६०।।

पद्ममालां पद्यरूपामृषिरामः प्रयच्छति ।
परं पद्म ! तवानृण्यं गन्तुं नैव वयं क्षमाः ।।
तथापि ऋषिसंदत्ता पद्यमाला प्रगृह्यताम् ।

।।६१।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्मरणम्

प्रा. खेमराज उपाध्यायः 'केशवशरणः'
वाल्मीकि क्याम्पस

न्याये कर्कशतर्कजालजटिले वेदान्तशास्त्रे ऽथवा
मीमांसादिविभिन्नदर्शनपथे शाब्दे ऽथ बोधे समम् ।
यस्याखेलदखर्वगर्वमहिता भास्वद्यशा भारती
सो ऽसौ पण्डिततल्लजो विजयतां पद्मप्रसादाह्वयः ।।
१

स्वीयेनानुपमेन बोधगुरुणा वैदुष्यसारेण यो
नेपालाभिजनो ऽपि भारतभुवि ख्यातिं परामाप्तवान् ।
तस्येयं जगतीप्रशस्तयशसो विद्यानिधेः स्वर्गति–
रद्यत्वे न करोति कं सहृदयं शून्यायितं चेतसा ।।
२

शास्त्रग्रामपथप्रदर्शनपरे नैयायिके वर्त्मनि
यान्ती पान्थततिः ससाहसमना दृग्गोचरे त्वय्यभूत् ।
विद्याद्योतितमानसे ऽद्य सुमनोऽलङ्कारभूते त्वयि
स्वर्याते वत! सा समस्तसरणी रिक्तायिता तिष्ठति ।।
३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यच्छिष्याः शतशः समिद्धयशसः प्रेक्षावदग्रेसराः
स्वीयाभिर्निरवद्यबुद्धिभिरलङ्कुर्वन्ति सर्वा दिशः ।
सोऽसौ भूसुरभूषणः सुचरितः पद्मप्रसादाभिधो
विद्वन्मौलिमणिः सशोकहृदयैः सर्वैरिह स्मर्यते ।।

४

भक्त्या निर्मलया प्रभुं पशुपतिं सन्तोष्य विश्वेश्वरं
त्वं यातोऽसि परं पदं शिवतमं तद् योगिनां दुर्लभम् ।
एतत्तुष्टिपदायते मतिमतां ज्ञानान्विते चेतसि
स्मारं स्मारमथापि तेऽद्य विरहं दोदूयतेऽस्मन्मनः ।।

५

क्वचिल्लसति शेमुषी प्रखरतर्कशक्त्युच्चया
क्वचित् सरलता सदा विबुधपूजिता दृश्यते ।
परं त्वयि गुणावुभौ दृढतया समं तस्थतु-
र्बुधोत्तम ! भवत्समः समधिगम्यते कोऽधुना ।।

६

विदां वर ! निवासभूर्भवतु यत्र कुत्रापि ते
परं सुरगवी मनस्यविरतं त्वयाधीयताम् ।
बुधाः खलु भवादृशा यदि भवन्ति दृग्गोचराः
धरा श्रियमियं तदैव वहतीति निश्चप्रचम् ।।

७

-◊-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रद्धाञ्जलिः

प्रा. गिरिधारी भट्टराई
वाल्मीकि क्याम्पस

संवत्सरे विक्रमभूमिपस्य मिते शिखावच्छरखेटकैकैः ।
वैशाखमासे भृगुजस्य वारे पक्षे सिते चक्रधरस्य तिथ्याम् ।।
१
सुवर्णकोश्युत्तरपूर्वरामेछापाख्यनीवृन्निकटप्रदेशे ।
नेपालमाताऽजनयत्स्वदेशे पद्मप्रसादाभिधमात्मजातम् ।।
२
प्राक् काष्ठमण्डपमगात्पठनाय पद्मो
दूरे स्थितं चरणयानमपेक्ष्य गेहात् ।
आगत्य तत्र कतिचित्समयानुषित्वा
अध्यैत वेदमथ पाणिनिशब्दशास्त्रम् ।।
३
सतर्कशास्त्राध्ययनैषणेन नेपालदेशादगमच्च काशीम् ।
वाराणसीनाथमनाथनाथं श्रीविश्वनाथं शरणं प्रपेदे ।।
४
गुरोः स वामाचरणाभिधानादधीतवान् कर्कशतर्कशास्त्रम् ।
अध्यापयामास स मारवाडीविद्यालये छात्रगणाननेकान् ।।
५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तर्काम्बुधेः पारगतो हि पद्मः प्राध्यापयन् कर्कशतर्कशास्त्रम् ।
नैयायिकानां प्रवरोऽधिकाशि स न्यायरत्नं पदवीञ्च लेभे ।।

६

हिमाद्रिरामेश्वरमध्यवर्तीविद्वत्समाजेन गृहीतनामा ।
नेपालमागत्य पुनः स पद्मः प्राध्यापयद्दर्शनशास्त्रजातम् ।।

७

स्वकीयपूर्वार्जितकर्मवेगाद् बिद्धो हि पक्षाहननेन पद्मः ।
तथाऽपि शय्याशरणः स पद्म आन्वीक्षिकीशास्त्रमपाठयन्माम् ।।

८

रोगाक्रान्तः शयनशरणो यापयित्वाऽष्टवर्षान् ।
माघे मासे प्रतिपदि तिथौ कृष्णपक्षे बुधस्य ।।
वारे खाग्न्यम्बरकरमिते वैक्रमाब्दे स पद्मो ।
विद्यावित्तस्त्रिदिवमगमत्पञ्च पुत्रान् विहाय ।।

९

पद्मप्रसादाय दिवं गताय श्रीभट्टराये गुरवे सहस्रम् ।
श्रद्धाञ्जलीनेष समर्पयेऽहं श्रीभट्टराई गिरिधारिनामा ।।

१०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रद्धाञ्जलिः

प्रा. गोपालनिधि तिवारी
वाल्मीकि क्याम्पस
सं. अध्ययन संस्थान

नेपालदेशस्य सुपुत्रवर्यो
भूमण्डले दार्शनिको वरिष्ठः ।
पद्मप्रसादो विदुषां समाजे
गम्भीरबुद्ध्या समलंकृतोऽभूत् ॥
१

काश्यां सुशिष्याञ्छतशो विधाय
न्यायादिशास्त्रं विततं हि तेन ।
नेपालदेशेऽपि तथैव विद्या
पाण्डित्यपूर्णा सफला प्रदत्ता ॥
२

शास्त्राशयं स्पष्टसुबोधरीत्या
संदर्श्य लोकोत्तरतीक्ष्णबुद्ध्या ।
विद्याप्रदाने सफलो बुधोऽयं
प्राकाशयच्छास्त्रनिगूढतत्त्वम् ॥
३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यो ग्रन्थमर्मज्ञतया सुदक्षो
धर्मे परिच्छेदविधौ विशिष्टः ।
निष्पक्षपातं सुविचारलग्नः
पद्मस्य तस्यैव वयं विधेयाः ।।

४

धृत्यादिसद्धर्मगुणैर्विभाते
त्यक्त्वा शरीरं सुरलोकमाप्ते ।
पद्मप्रसादे त्वयि बोधराशौ
श्रद्धाञ्जलिर्मे सततं विभातु ।।

५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्माकं द्वन्द्वसहिष्णुता

प्रा.जुननाथ पण्डितः
नायब बडागुरुज्यू

नव्यन्यायधुरीणतीक्ष्णविमलप्रज्ञाप्रचण्डप्रभः
साहित्याम्बुधिमन्थनोत्थसुधया सिञ्चन् स्वकां वैदुषीम् ।
पारेगङ्गमनेकशास्त्ररसिकः प्रख्यापयन् स्वं यशः
नेपाले विदलौकिकः प्रतिभया पद्मप्रसादोऽजनि ।।

१

तस्यैतस्य गुणाम्बुधेः सुरपुरे यातं यशो निर्मलं
स्वर्गस्थैर्विबुधैश्च भूमिविबुधः प्रेम्णा स आकारितः ।
तत्सम्पर्कवियोगदुःखमधिकं संचिन्त्य वा तत्सुखं
जाता द्वन्द्वसहिष्णुता विधिवशादस्माकमेकक्षणम् ।।

२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हरे शिव !

प्रा.टीकाराम अधिकारी
वाल्मीकि क्याम्पस

विबुधविदितो विद्याज्योत्स्नाप्रसन्नजनावलि-
र्हरिहरचतुर्वक्त्रादीनां स्तुतिप्रमुदन्वितः ।
शमदमगुणैर्दीप्तो विद्वान् महापुरुषोपमः
समजनि यदा पद्माख्यो वै बुधो विनयान्वितः ॥
॥१॥

मनुजजनुषोऽभूवन् शिक्षायुताश्च नयाश्रिता-
स्तिमिरबहुला पृथ्वी जाता तदा हि समुज्ज्वला ।
चरणरजसा पूताः फेनोपमाः सकला वयं
स हि विहितवान् देहत्यागं कुतोऽत्र हरे शिव! ॥
॥२॥

जगति मनुजा मग्ना ज्ञानोदधौ नहि तादृशाः
इह तु सकलाः रागद्वेषोदधेः पयसाऽऽप्लुताः ।
भुवनविदितं रत्नं विद्वज्जनं रचयँस्ततो
विधिरपि विनष्टं तत् सद्यः करोति हरे शिव!
॥३॥

❋

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गुरोर्वन्दना

प्रा. तोयनाथ पाण्डेयः
सहायक डीन
वाल्मीकि क्याम्पस
संस्कृत अध्ययन संस्थान

हत दैव ! भवत्कृतां दशां
विषमां तां वत वोढुमक्षमाम् ।
कथमुत्सहसे विलोकयन्
गुरुपत्नीं मलिनां सिताम्वराम् ।।१।।

१

उदधिं प्रविहाय साम्प्रतं
समुपागच्छसि ह्यश्रुतृष्णया ।
नयनेषु प्रपूरितं पयः
किमु तोषं प्रपिवन् प्रयास्यसि ।।

२

वहुशः श्रुतवानहं पुरा
तपसि स्वाध्ययने परायणाः ।
प्रगतिं रचयन्ति ते सदा
किल तेषां न जगत्प्रयोजनम् ।।

३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति साधु विविच्य मानसे
परकल्याणकृते सदैव सः ।
अपहाय समस्तदुर्गुणं
गुणपूर्णो विधिना विनिर्मितः ।।

४

उदिते च रवौ प्रवर्तिते
सततं ज्ञानमखे स दीक्षितः ।
बहुशिष्यगणाः कृतार्थता-
मगमञ्ज्ञानपवित्रमानसाः ।।

५

निजजीवनमर्पयन् गुरु-
र्गुरुकार्ये तनुमोहमुक् सदा ।
सहसा भगवत्पदं गतः
प्रियशिष्यानपहाय साम्प्रतम् ।।

६

हतदैवक भोस्त्वमीदृशं
गुणवन्तं बहुशास्त्रसागरम् ।
अवधीः किल तथ्यवादिनं
जनमान्यं दृढतर्कपण्डितम् ।।

७

वद नाशयता त्वया च को
बहुलाभः समुपार्जितो बत ।
न स एव विनाशितस्त्वया
बुधशिष्याः स्वजनाश्च पातिताः ।।

८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जननान्तरदोषतस्त्वया
बुधवर्यो यदि दण्डितो भवेत् ।
कृतिपद्मप्रसादसूनवः
किमु कष्टे विनिपातिता वृथा ॥

९

अतिकष्टविसृष्टपुष्करं
नयनेभ्यो भवतेऽभिरोचते ।
मधुरं श्रृणुषे सवादनं
ननु गीतं तनुताडनं रुतम् ॥

१०

हतदैवक भोस्तथापि मे
दिवि संप्रापय वन्दनां खलु ।
गुरुदेहविसर्गवेदना-
मनुभूय व्यथितोऽस्ति तोयकः ॥

११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विद्वत्पूजा

प्रा. नयराजः पन्तः
वाल्मीकि क्याम्पस

लब्धोत्पत्तिर्मध्यमे विप्रवंशे
देवीदत्तात् प्राप्तपूर्वप्रबोधः ।
छात्रावासे कान्तिपुर्याः प्रविष्टः
पाठागारे ऽध्यैत पद्मप्रसादः ।।
।।१।।

काश्यां वामाचरणविदुषः सोऽपठद् न्यायशास्त्रं
नित्यानन्दादलभत गुरोर्धर्मशास्त्रादिशिक्षाम् ।
धर्मत्राणे विहितमनसो ऽत्यन्तसङ्घर्षशीलाद्
वेदान्तादीनलभत गुरोर्द्राविडाल्लक्ष्मणात् सः ।।
।।२।।

न्यायाचार्यो बुधपरिषदः संमतोऽभूत् स काश्या–
मासीद् नानाजनपदभवश्छात्रवर्गस्तदीयः ।
छेत्तुं शङ्काः स्मृतिविषयजा न्यायशास्त्रादिजाश्च
भूरीन् ग्रन्थान् नयनविषये मानसे चाऽकरोत् सः ।।
।।३।।

राणाराज्ये गुरुतरपदं लब्धुकामैः प्रवीणैः
स्वीया विद्या प्रभुचरणयोर्वन्दितां नीयते स्म ।
विद्यासक्तः कपटरहितः पाठनादिप्रवीणो
राणाराज्ये ऽलभत न पदं विज्ञपद्मप्रसादः ।।
।।४।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पत्नी याता त्रिदिवमभजत् स द्वितीयां द्वितीयां,
दुर्दैवेन त्रिदिवमगमन् पूर्वपत्न्यश्चतस्रः ।
सोऽतिक्रान्तःपरिणयवयः पञ्चमीं च द्वितीया-
माप्नोत् सौख्यं गृहजमभवत् तस्य नातिप्रभूतम् ॥

॥५॥

पाठालये दैवतभाषितस्य
महत्युपाध्यक्षपदं स विद्वान् ।
रसेषुवर्षो ऽलभत स्वदेशे-
ऽध्यक्षोऽभवत् तत्र बुधः स पश्चात् ॥

॥६॥

दृष्ट्वा कालं चतुरपुरुषैर्भाषणे तन्यमाने
सिद्धान्तेऽस्मिन् प्रथितमतिभिः स्वीकृते काव्यकारैः ।
विद्वत्सङ्गात् प्रथमविहिताच् शास्त्रसिद्धान्तनिष्ठो-
ऽशक्नोद् वक्तुं परिषदि बुधो नैष कालानुसारम् ॥

॥७॥

पक्षाघातं दृढमुपगतो रोगशय्यां प्रपन्नो
वर्षाण्यष्टौ कथमपि सुधीर्यापयित्वा, विहाय ।
जायां पुत्रान् शरपरिमितांस्तावतोश्चैव पुत्री-
रौज्झीद् देहं पशुपतिपदं प्राप्य ऋष्यद्रिवर्षः ॥

॥८॥

स्वर्यातोऽपि स्वचरितबलाद् विज्ञचित्तं प्रविष्टो
मोहं छेत्तुं प्रभवतु चिरं विज्ञपद्मप्रसादः ।
वंशद्वन्द्वं प्रसरतु शुभं पण्डितेशस्य तस्य
तस्मै शान्तिं प्रदिशतु शिवस्तद्गृहे स्ताच् शिवं च ॥

॥९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पान्थ–निवृत्तिः !

पूर्णप्रसादः 'ब्राह्मण'ः
भू. पू. प्रमुख निर्वाचन आयुक्त,
निर्वाचन आयोग

उपकण्ठे हिमवतो, नेपाले लक्ष्यनोदितः ।
दृप्तात्मा पथिकः कश्चिदायातो ऽलक्ष्यदूरतः ।।
।।१।।
नाऽसीत् सत्रा तेन कुप्यं, रूप्यं वा सैनिकं बलम् ।
आसीदन्तर्भूमिकायां ज्योतिरेकं हि केवलम् ।।
।।२।।
स्वदर्शनार्थे मन्वानस्तमःशक्ति स विद्विषम् ।
विजानाति स्म तच्छिद्रं, प्र जागर्ति स्म चाऽनिशम् ।।
।।३।।
संवर्धय स्वात्मबलं, शश्वदाश्रय धीरताम् ।
'अणु'-शस्त्रं शातयैवं स प्रपेदेऽभ्यमित्र्यताम् ।।
।।४।।
भिन्दद् विपक्षशक्ति तज्ज्योतिः प्रापदसीमताम् ।
तदा देशो विदेशो वा को नाऽगात् सप्रकाशताम् ? ।।
।।५।।
विद्यालयाः कतिपये जना वा कत्यदर्शनाः ।
सध्रीचा ज्योतिषस्तेन कृता एव सदर्शनाः ! ।।
।।६।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अवधारयता विश्वं स्वाप्नं जालमिवाऽयतम् ।
धनीयितं सदा तेन नैव जातु धनायितम् ॥

॥७॥

अववर्णन्नमुं धीराः, भूपालाः प्रत्यतिष्ठिपन् ।
तद्विशेषधियश्छात्राः प्रथिमानमपप्रथन् ॥

॥८॥

एवं निःस्पृहतादर्शं, ज्योतिरेकं च शंसितम् ।
वितीर्य नः स पथिको न्यवर्तत यथागतम् ॥

॥९॥

इतः प्राज्ञगणः 'पद्मप्रसादः स्वरगात्' इति ।
स्मारं स्मारं तस्य परं प्रदानमनुशोचति ! ॥

॥१०॥

× ×

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पद्मपञ्चकम्

प्रा. बदरीनाथः भट्टराई

यः पर्वतीयः समधीत्य शास्त्रं लेभे प्रतिष्ठां विदुषां समाजे ।
विद्या यदीया प्रसृता जगत्यां पद्मप्रसादाय नमोऽस्तु तस्मै ।।

।।१।।

न्याये प्रवीणं विदितान्यशास्त्रं यं भारती श्लिष्टवतीति हेतोः ।
पद्मा प्रसादं नचकार यस्मिन् पद्मप्रसादाय नमोऽस्तु तस्मै ।।

।।२।।

प्रसादतो यस्य सहस्रसंख्याश्छात्राः परीक्षासरितं प्रतीर्य ।
अत्युच्चमाचार्यपदं समापुः पद्मप्रसादाय नमोऽस्तु तस्मै ।।

।।३।।

नेपालतः प्राप्य निमन्त्रणां तां काश्याः सपर्यां परिहाय सद्यः ।
अदर्शयद् यो निजदेशभक्तिं पद्मप्रसादाय नमोऽस्तु तस्मै ।।

।।४।।

विद्वानसौ देवसभासु योग्य इतीव कालोऽनयदिन्द्रलोकम् ।
परन्तु येनाऽद्य वयं वियुक्ताः पद्मप्रसादाय नमोऽस्तु तस्मै ।।

।।५।।

×

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशोच्यः श्रीपद्मप्रसादः

बुद्धिसागरः पराजुलिः
प्रमुख अनुसन्धान अधिकारी
नेपाल राष्ट्रिय अभिलेखालयः

पद्मप्रसादो विदुषां वरेण्यः
स्वर्गेऽमरत्वं गतवाँस्तथापि ।
कीर्त्या नृलोकेऽप्यमरः स साक्षात्
सुपर्वपूज्यो धिषणो द्वितीयः ।।
।।१।।
शास्त्राणि यस्मात् सुधियोऽपि पेठु–
श्छात्राश्च वैदुष्यमवापुरस्मात् ।
श्रीशारदायाः प्रिय एष पुत्रो-
ऽश्राम्यत् सदाऽध्यापनकार्य एव ।।
।।२।।
वाचं कणादस्य च गौतमस्य
विचार्य दाक्षीतनयस्य नित्यम् ।
यो धर्मशास्त्रार्थविनिर्णयाय
सदोद्यतः सूक्ष्ममतिर्मनीषी ।।
।।३।।
वाराणसीपण्डितमण्डलीषु
लब्धप्रतिष्ठो मितवाक्यभाषी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्फीतं यशो दिक्षु विकीर्य यातः
स्वर्गं सदा मानयुतो महात्मा ।।
।।४।।

नेपालरत्नं गुणधाम सैष
काश्यां स्थितश्छात्रचयं प्रपाठ्य ।
देशं स्वकीयं सुरलोकतुल्यं
मत्वा ऽऽ ययौ प्रेमपरीतचेताः ।।
।।५।।

नेपालभूपालविशालचित्ते
श्रद्धां परां प्राप्य समादृतो यः ।
विद्यालये संस्कृतपाठनीये
प्राधान्यमुच्चैः समवाप्तवान् सः ।।
।।६।।

दुर्दैवपाकं समवाप्य यो ऽ सौ
व्याधिं महान्तं बत दुर्भिषज्यम् ।
विभ्राण उग्रां किल मृत्युशय्यां
तेपे तपो ऽ ष्टौ शरदः प्रपन्नः ।।
।।७।।

कालस्य माहात्म्यवशादनित्यम्
उत्सृज्य देहं भुवि भौतिकं स्वम् ।
ज्योतिर्मयं ज्ञानवपुर्गृहीत्वा
यातो गुरुश्चेत् कथमत्र शोकः ।।
।।८।।

स्मृत्यै पद्मप्रसादस्य श्लोका अष्टौ विनिर्मिताः ।
पराजुलीत्युपाह्वेन बुद्धिसागरशर्मणा ।।
।।९।।

—१—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रद्धाञ्जलिपञ्चकम्

प्रा. माधवप्रसाद देवकोटाः
पाल्पा, लुम्बिनी अञ्चल

वाणासुरस्य सरसि श्रीमान् पद्मप्रसाद आविरभूत् ।
सूर्याश्रयानपेक्षो यशःपरागो दिवानिशं जाग्रत् ॥
॥१॥
अन्तेवासिभ्रमरा बहुसंख्याका विभिन्नदेशीयाः ।
जाता यतः कृतार्था अमन्दविद्यामरन्दमासाद्य ॥
॥२॥
तस्मिन् खलूग्रमन्योर्विधिवशतो वा चिराय विकलाङ्गे ।
षड्दर्शनपदविरहाद्धत ते भ्रमरा अषट्पदा जाताः ॥
॥३॥
अधुना तु हा विलीने तस्मिन् सुमनोगणस्पृहाविषये ।
शिवपार्षदस्य बाणासुरस्य जातं सरोवरं शून्यम् ॥
॥४॥
श्रद्धाञ्जलीन्प्रददतो जगदीश्वरमर्थयामहे विनयात् ।
सुरदीर्घिकाप्रदेशाद् विबुधालीनां स मोदमातनुयात् ॥
॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रद्धाञ्जलिः

प्रा. रामचन्द्रः पौडेलः
वाल्मीकि क्याम्पस

शास्त्रावगाहेन नितान्तपूताः
स्वाध्यायसत्कर्मसु संप्रसिद्धाः ।
सदैव शास्त्रप्रणिधानसक्ताः
प्राध्यापनेऽहर्निशदत्तचित्ताः ॥
॥१॥

पद्मप्रसादा विदुषां वरेण्याः
स्वर्गं गता भूसुरवृन्दगण्याः ।
इत्येव मर्मच्छिदुरामशोभनां
संश्रुत्य वार्तां श्रवणप्रदाहिकाम् ॥
॥२॥

शोकेन दावाग्निसमेन निर्भरं
जाताः प्रतप्ताः सकला मनीषिणः ।
रत्ने विनष्टे जगदेकसारे
कथं नु विज्ञाः सुखमालभन्ते ॥
॥३॥

विहाय देहं परमं पवित्रं
दिवं गते पूज्यतमे गुरौ नः ।
नेपालभूमेः सुषमा विनष्टा
वयं ह्यनाथाः सपदि प्रजाताः ॥
॥४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अजस्रविद्याव्यसनप्रसक्तं
जिह्वाग्रभागं समलम्ब्य यस्य ।
स्थिता सदाऽनेकरसेषु लुब्धा
सरस्वती कं किल संश्रयेत ।।

।।५।।

समेषु तन्त्रेषु समाधिकाराः
प्रमाणशास्त्रेषु कृतावगाहाः।
पदेषु वाक्येषु च संप्रसिद्धा
जयन्ति ते कोविदवर्गमुख्याः ।।

।।६।।

यस्मात्समासाद्य यथेच्छविद्यां
लब्ध्वा समुच्चां पदवीमनेकाम् ।
शिष्याः समस्ताः खलु भारतीयाः
विभान्ति ते भारतभूमिभागे ।।

।।७।।

प्रकाण्डपाण्डित्यबलेन सम्यक्
सन्तोष्य वादे विदुषः प्रसिद्धान् ।
नेपालमातुः सततं प्रतिष्ठां
प्रावर्द्धयद् यो भुवि भारतस्य ।।

।।८।।

आ–मेचिकाल्यन्तविराजमानः
समस्तभागो नयपालराष्ट्रे ।
समावृतो यस्य सुशिष्यवर्गैः
स्वाध्यायकृत्यप्रथन–प्रवृत्तैः ।।

।।९।।

सत्तर्कसंबोधनतोऽतितुष्टान्
आवर्जयन्तं शतशः सुशिष्यान् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लोकोत्तराध्यापनकार्यदक्षं
गुरुं वरेण्यं न हि विस्मरामि ॥
॥१०॥

संस्मृत्य संस्मृत्य गुरोश्चरित्रं
पूर्वानुभूतं सकलानुकार्यम् ।
संरुद्धकण्ठो गतधीरभावो
भवामि मोहान्धवृतो नितान्तम् ॥
॥११॥

अनन्यसाधारणबुद्धिवैभवान्-
मनोज्ञवेशेन च सात्त्विकेन ।
विद्यावदातोज्ज्वलरूपतोऽपि
केषां न वन्द्या गुरवः प्रकामम् ॥
॥१२॥

हा हा वियुक्ता नयपालमाता
पुत्रेण चन्द्रोपमपद्मकेन ।
धृतिं समादाय न सुस्थिता चेत्
सद्यो विदीर्णा जनयेद् भयं सा ॥
॥१३॥

यस्योपदेशमधिगम्य सदा प्रपूतं
ध्वान्तं निरस्य मनसः सदसद्विवेकम् ।
संप्राप्य चास्मि निजकर्मणि संप्रवृत्त-
स्तं पूज्यपादमनिशं प्रणमामि भक्त्या ॥
॥१४॥

चन्द्रान्तरामपदतो हि मनाक् प्रसिद्धः
पौडेल इत्युपपदेन समाश्रितोऽहम् ।
संग्रथ्य माल्यमरसं किल पद्यरूपं
संप्रापये गुरुवरस्य पदारविन्दे ॥
॥१५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पद्मस्मृतिः

भू. पू. प्रधानाचार्य
रामनाथ आचार्यः

पद्मप्रसादविबुधो विबुधेन्द्रवन्द्य-
पादाब्जगी:पतिसमो ह्यसमो द्विजेषु ।
शास्त्रोदधिप्रमथकर्मणि मन्दराद्रिः
स्वर्गं गतोऽद्य बत हा गुणराशिरम्यः ।।
।।१।।

नाम्ना पद्मप्रसादः शिशुरपि विनयी पुण्यपुञ्जेन किं वा
सर्वोत्कर्षाप्तिकामादथ पठनविधौ बुद्धिमाधत्त चित्ते ।
शैलप्रान्तप्रदेशादिह समुपगतो राजधान्यामदीन-
श्छात्रावासे स्थितिश्चासनमपि पठनं प्राप्तवान् दैवयोगात् ।।
।।२।।

यामन्तरेण शास्त्रेषु प्रवेशो नैव पार्यते।
सिद्धान्तकौमुदी तादृग्यस्यासीद् वदनाम्बुजे ।।
।।३।।

अन्तः प्रविश्य बहुशो बहुदेशिकेभ्यः
काश्यामधीत्य विनयी दिवसाननैषीत् ।
तं तादृशं श्रुतिधरं प्रतिभापरीतं
शिष्यं समीक्ष्य गुरवस्तुतुषुः प्रकामम् ।।
।।४।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नेपालस्य बुधेषु कोविदवरो नैतादृशः कोऽप्यभू-
न्नव्यन्यायधुरन्धरो न भवितेत्येवं दृढं ब्रूमहे ।
श्रीवामाचरणाद् गुरोर्गुरुमतेर्यः प्राप्तशिक्षोदयः
काश्यामेव न केवलं भरतभूखण्डेऽपि लेभे यशः ।।

।।५।।

वाराणसेयबुधतल्लजतन्यमान-
शङ्कार्तिं निशितबुद्धिबलेन सद्यः ।
योऽपाहरत् समुचितोत्तरदानशैली-
मालम्ब्य तन्मनसि चाथ मुदं व्यतानीत् ।।

।।६।।

आजीवनं पठनपाठनकार्यदत्त-
चेता निरस्तविषयान्तररम्यभावः ।
क्षोणीतले समधिगम्य परां प्रसिद्धिं
यः पाञ्चभौतिककलेवरमुत्ससर्ज ।।

।।७।।

पद्मप्रसादविदुषो विबुधाधिराज-
मध्ये सभोल्लसितमूर्तिजुषः सुरस्य ।
श्रीरामनाथरचिता ऽमलपद्यमाला
नूत्ना पदाब्जयुगले सुचिरं चकास्तु ।।

।।८।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रद्धाञ्जलिः

प्रा. लोकनाथ ढकाल
वाल्मीकि क्याम्पस

वंशीवादनशालाय चेतनानन्ददायिने ।
सचेतनाय कृष्णाय जगतो गुरवे नमः ॥
१

यत्सन्निधौ शिथिलतां स्वयमेव यान्ति
जिज्ञासुमानसपटानवबोधवन्धाः ।
विद्वद्वरालिकुलसेवितपादपद्मं
पद्मप्रसादगुरुवर्यममुं नमामि ॥
२

जन्मभूमिः

नेपालभूपालसुपालितायां
माहेन्द्रदिग्भूधरभूधरण्याम् ।
ग्रामोऽभिरामो बहुसंख्यधामा
सुशालको राजति शालुनामा ॥
३

वारुण्यां दिशि यस्य नन्दति नदी ताम्राभिधा कौशिकी
यत्रस्था बहवो जनाः कृषिपराः पुष्णन्ति केचित् पशून् ।
वाणिज्येन च निर्वहन्ति कतिचिद् भृत्यां परे केचन
रामेछापसमाख्यवित्तविषयस्यान्तर्गतो भात्यसौ ॥
४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्री सामली भगवती भवरोगहन्त्री
विभ्राजतेऽत्र सुचिरात्सहदेवताभिः ।
यस्या अनुग्रहवशात्प्रणयोपहारा
ग्राम्या जना विदधते ससुखं निवासम् ।।
५

जन्मः

ग्रामेऽत्र कश्चिदनवद्यगुणाग्रगण्यो
विप्रो वशिष्ठकुलजः कृतविद्वरेण्यः ।
आसीत् स्वधर्मनिरतः सुयशा वदान्यो
दीनानुकम्पनपरो दिननाथसंज्ञः ।।
६

शीलादिसद्गुणगणाञ्चितकृष्णमायां
स ब्राह्मणः स्वसदृशीं परिणीय भार्याम् ।
सत्पात्रपुत्रजननोचितसाधनानि
पुण्यानि दारसहितः कृतवानुदारः ।।
७

विप्रप्रियेयमचिरात् सुकृतप्रभावात्
प्रासूत पुत्रममलं सरसीव पद्मम् ।
श्रद्धाश्रितेन मनसा समनुष्ठिता हि
प्रायेण धर्मविधयः सफला भवन्ति ।।
८

वह्न्याशुगाङ्कशशिसंमितवैक्रमे ऽब्दे
वैशाखशुक्लभृगुवासरविष्णुतिथ्याम् ।
उच्चस्थिताम्बरचरेक्षितसौम्यलग्ने
स्वोत्पत्तितो भुवमलङ्कृतवान् स बालः ।।
९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सस्नौ सचैलमवलोक्य मुखं स सूनो-
र्हर्षेण जातकविधिं विधिवच्चकार ।
× भूदेवदेवपितरः स्वजनाश्च तुष्टा
आशीर्वचोभिरमितैः प्रशशंसुरेनम् ॥

१०

पद्मप्रसादसदृशं वदनप्रसादम्
संवीक्ष्य हृष्टहृदयो जनकः सुतस्य ।
वह्निं द्विजं च गणकं सविधि प्रसाद्य
पद्मप्रसाद इति नाम चकार युक्तम् ॥

११

अक्षरपरिचयः

पित्रोः प्रहर्षनिवहेन समं स बालः
शुक्लेन्दुवत्प्रतिदिनं ववृधे मनोज्ञः ।
अङ्कं गतः पितुरसौ मधुरस्वरेण
कः खश्चगाविति पुनः पुनरभ्यधाच्च ॥

१२

बाल्ये ऽप्यसौ सत् प्रतिभाविभूषितः
संख्येयविद्वान् भवितेत्यलक्षत ।
विशालशालद्रुमतां गमिष्यति
दृष्टा हि पोते सरसोरुपत्रता ॥

१३

× देवादीनां तुष्टानपि विप्रस्यैव प्राधान्यादभ्यर्हितत्वविवक्षया तद्वाचक-भूदेवपदस्य पूर्वप्रयोग इति । 'लक्षणहेत्वोः क्रियायाः' इति निर्देशात्प्रकरणमिदमनित्यमिति तत्त्वबोधिनीकारः । इति लेखकः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काष्ठमण्डपआगमनम्

वर्षेषु पञ्चषमितेषु गतेषु मूत्र-
कृच्छ्राख्यदु:सहरुजा भृशमर्द्यमान: ।
पित्रा समं समुपसृत्य स राजधान्यां
शल्योपचारकरणेन बभूव कल्य: × ।।

१४

याते ऽपि रोगविधुरे स गृहं न यातो
विद्वान् बुभूषुरसम: स्थितवानिहैव ।
प्रेम्णा श्रमेण च पठन्नभवत् तथैव
रोगो ऽप्यहो लिखति कस्य तु भाग्यरेखा: ।।

१५

तातो ऽप्यगात् गृहमिमं निजपूर्वजस्य
श्रीजीवनाथसुधिय: सविधे निधाय ।
स भ्रातृजातमपि संस्कृतसेवनोत्कं
सूदार आत्मजमिवानुचकम्प एनम् ।।

१६

धन्य: शिशु: पिपठिषु: पितरौ विहाय
तस्थौ य, एकतनयौ पितरौ च धन्यौ ।
धन्यं च दैवमपि तत्, पितरौ हि तस्मिन्
प्राचोदयद्विरहदुर्भरभारवाहे ।।

१७

विद्यालयप्रवेश:

लग्ने शुभे समुपनीत उपेत्य सो ऽयं
विद्यालये पठितवाञ्श्रुतिमङ्गयुक्ताम् ।
शीलेन सत्प्रतिभया च गुरून् समस्तान्
श्रीविष्णुविश्वप्रभृतीन् समतोषयच्च ।।

१८

× . कल्य: = निवृत्तरोग: ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

छात्रालये नरपतेर्निवसन् सुखेन
संपठ्य विष्णुविदुषः सपदानुशिष्टिम् ।
काव्यं च सोमसुधियो बुधदेविदत्तात्
युग्मे ऽपि मध्यमपरीक्षणमुत्ततार ।।

१६

वाराणसीगमनम्

नेपालराजगुरुतः स खगेन्द्रराजाद्
सम्प्राप्तवृत्तिरगमत्पठनाय काशीम् ।
न्यायं पपाठ निपुणः समयक्रमेण
तत्रापि मध्यमपरीक्षणमुत्ततार ।।

२०

न्यायाचार्यपदप्राप्तिः

श्रीवामाचरणाच्छुभाचरणकाद्वङ्गीयविद्वद्वरा-
न्नव्यं न्यायमतं पुरातनमपि प्राप्यातितुष्टाद्गुरोः ।
न्यायाचार्यपदेन दुर्लभतरेणान्यैस्तदाऽऽभूषितः
पद्मः पण्डितमण्डलेषु शुशुभे मार्त्तण्डवज्ज्योतिषा ।

२१

आचार्योत्तरणादनन्तरमपि प्राधीत्य वर्षत्रयं
व्युत्पत्तिं विदधावनेकविषयां वैदुष्यसंवर्धिनीम् ।
गोपीनाथमहोदयस्य सुधियो निर्देशकत्वे स्थितः
कार्यं पण्डितरूपयोग्यमनुसन्धानादिकं चाकरोत् ।।

२२

श्रीमल्लक्ष्मणशास्त्रितोऽतिविदुषो वैयासिकीमध्यगा-
न्नित्यानन्दगुरोरनेकविषयप्रख्यातवैदुष्यकात् ।
कृत्स्नां व्याकृतिधर्मकर्मविषयां विद्यामवेदीदयं
तत्तद्वेद्यविदोऽध्यगच्छदखिलं वेद्यं स इत्थं गुरोः ।।

२३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अध्यापकत्वम्

स चाटुकारादिभिरर्जनीयां
स्वदेशसेवामभिवाञ्छनीयाम् ।
संत्यज्य काश्यां चकमे निवासं
न ह्यात्मवन्तोऽन्यवशा भवन्ति ।

२४

श्रीमारवाडीपठनालयादौ
सन्न्यासिनामध्ययनालये च ।
विद्यालये गोयनकाऽभिधेऽसौ
प्रपाठयामास विभिन्नपाठ्यान् ॥

२५

न्याये नवीने च पुरातनेऽसौ
साहित्यवेदान्तपदादिशास्त्रे ।
निष्णातसुस्नातकशिष्यवर्गान्
विधाय काश्यां सुयशो व्यतानीत् ॥

२६

मुद्राप्यमाणबहुपुस्तकशोधनेन
संगृह्य पुस्तकवराण्यधिमूल्यकानि ।
सूक्ष्मातिसूक्ष्मधिषणः स विलोक्य तानि
छात्रान् बुधाँश्च समशिक्षयदाप्तबोधैः ॥

२७

देशो ममायमसमश्रुतशीलवद्भि-
र्विद्वद्वरैः सुनिपुणैः समलङ्कृतः स्यात् ।
इत्थं विचार्य नयपालजविप्रबालान्
स्नेहादपाठयत भारतगोऽपि सोऽयम् ।

२८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्यायरत्नपदप्राप्तिः

राजेश्वरादिविद्वद्भिर्भारतीयविभूतिभिः ।
'न्यायरत्न' पदेनासौ सत्कृतोऽभूद्विदां वरः ॥
२९

विद्यया स्वयमसौ सुशोभितो
न्यायरत्नसुपदेन भूषितः ।
प्रोज्ज्वलात्मशिखया भृशं [1] श्रितो
दिद्युतेऽग्निरिव सर्पिषैधितः ॥
३०

काशीतो नेपालआगमनम्

समृद्धयेऽसौ निजजन्मभूमेः
पुनः पुनर्भूपतिनाऽनुरुद्धः ।
नवाम्बराभ्राक्षिभिरन्वितेऽब्दे
नेपालमागात् परिहाय काशीम् ॥
३१

उपप्राचार्य [2] प्राचार्यपदाभ्यां समयक्रमात् ।
आदृतोऽसौ नृपालेन रराज द्विजराजवत् ॥
३२

छात्रान् पुत्रानिव स्निग्धैर्नेत्रैःपश्यन्नुदारधीः ।
काश्यामिवेह च प्रेम्णा नानाशास्त्राण्यपाठयत् ॥
३३

---

[1] भृशं दिद्युत इत्यन्वयः । अन्त्यानुप्रासलिप्सया कृतमेकपदव्यवधानं सहृदयैः क्षन्तव्यम् । इति लेखकः ।

[2] 'प्रह्वे वा' इति विधिसत्वेऽपि अप्रयुक्तदोषो मर्षणीयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कैशोर एव त्रिदिवं गतायां
बालाभिधायां प्रथमोढपत्न्याम् ।
उवाह पित्रोर्वचनाद् द्वितीयां
चन्द्रप्रभाऽऽख्यां स पुनर्द्वितीयाम् ।।

३४

तस्यां च दुर्दैववशाद्गताया-
मनात्मजायां सुरराजधान्याम् ।
अर्केण पाणिग्रहणं विधाय
स पर्यणैषोद् गृहिणीं तृतीयाम् ।।

३५

पूर्णाह्वया साऽपि कुमारमेकं
रामाभिधानं निजवंशतानम् ।
विहाय देवेन्द्रपुरं जगाम
निवारयेदीश्वरचेष्टितं कः ।।

३६

अनाश्रमो नैव वसेद्द्विजाति-
रित्यर्थमार्षं वचनं विलोक्य ।
भार्यामकार्षीद्विधिवच्चतुर्थी-
मुमामिवेशः स उमासमाख्याम् ।।

३७

प्रियंवदा साऽपि गुरुप्रियाऽगात्
प्रसूय पुत्रीं सुरलोकमेव ।
इत्थं स विघ्नैर्विहतोऽपि धीरो
नाध्यापनादेस्तपसो व्यरंसीत् ।।

३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अध्यापनादौ निरतस्य पुंसो
नावर्जनीया भवतीह भार्या ।
तथाऽपि गार्हस्थ्यविधावहेया
मवोढ जायामथ पञ्चमीं सः ॥

३९

दयिते दयितस्य कर्मणि
निपुणा सौम्यगुणा पतिप्रिया ।
चतुरश्चतुरान् सुतानसौ
ललिताऽसूत सुताचतुष्टयम् ॥

४०

चिररोगयुगग्रपुत्रको
रहितान्याय–पराकृताञ्जलिः ।
स चतुःशतरूप्यमासिकै–
र्गृहहीनः कथमप्यवर्तत ॥

४१

सपरिश्रमर्मार्जितैर्धनैः
प्रथमश्रेणिकवेतनैस्तथा ।
मुनिचन्द्रनिधोन्दुसंमितात्
परतोऽब्दात् स सुखं व्यवाहरत् ॥

४२

स पुरा भृशदुःखितोऽप्यनु
प्रमुदा यापयति स्म वासरान् ।
भवचक्रपथे हि यायिनं
सुखदुःखे क्रमशोऽनुगच्छतः ॥

४३

सूर्योदयात्प्रथममेव समुत्थितोऽसौ
दैनंदिनं सकलनित्यविधिं विधाय ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विद्यालयं प्रतिगतोऽन्वहमेव कल्ये
संपाठ्य शिष्यगणमन्यकृतिं व्यधत्त ॥
४४

स्वावासमेत्य तदनु स्वयमेव भक्तं
निर्माय भोजनमसौ कुरुते स्म नित्यम् ।
इत्थं स धर्मसुरवाङ्मययोर्निकाय
आसीद् गृहीततनृवपूर्जगतो हिताय ॥
४५

अध्यापनाध्ययनयोरधिकानुरागात्
ते एव जीवनतरोः सुफले रसाले ।
संभूषयन्ति भुवनं हि यदर्थमाप्ताः
कार्यं तदेव गणनार्हणमेति तेषाम् ॥
४६

व्यक्तित्वम्, योग्यता च

प्रकाण्डपाण्डित्यमगाधबोधः
सत्या मिता युक्तियुता च वाणी ।
विचारसारोऽपरिवर्तनीयः
श्रितो गुणैरेभिरसौ रराज ॥
४७

सुनिर्णयः कर्कशतर्कशक्ति-
रपूर्वपूर्वोत्तरपक्षसृष्टिः ।
शब्देऽनुमाने च विशेषबोधो
गुणैरमीभिः स भृशं चकाशे ॥
४८

सदुत्तरस्फूर्तिरतीव शीघ्रं
गभीरशास्त्रोदधिगाहनं च ।
दया धृतिः क्षान्तिरपक्षपातो
गुणा अमी तं समुपासते स्म ॥
४९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विद्वत्सुवर्णे बुधवर्णनीये
गुणा अभूवन्नितरेऽपि गण्याः ।
'सर्वे गुणाः काञ्चनमाश्रयन्ति'
बुधोक्तिरेषा हि मृषा कथं स्यात् ।।

५०

आचारपूतो निजधर्मनिष्ठो
ज्ञानाग्निदग्धस्वपरात्मभेदः ।
वरिष्ठविद्वद्व्रजसंप्रतिष्ठो–
ऽकरोत्स शुभ्रां यशसा धरित्रीम् ।।

५१

शास्त्रोपदेशविधिना स्थितये धराया
आज्ञापितो भगवता स्वकरस्थ पद्मः+ ।
पद्मप्रसादधरणीसुररूपतः किं
स्वोत्पत्तितो भुवमलङ्कृतवान् स एषः ।।

५२

अथवा– नानाविधान् बुधवरानभिसृज्य भूमौ
स्वं सर्जनं समभिवर्धयितुं प्रकामः ।
पद्मप्रसादगुरुरूपतयाऽवतीर्य
पद्मोद्भवो बुधकुलं किमलंचकार ।।

५३

गुरुवरं प्रति

कण्ठे करोस्यखिलशास्त्रसदुक्तिमाला
नानाविधान्बुधगणान् सृजसीक्षणेन ।
प्रासूयथाः शिवसुतं चतुराननञ्च
त्वं कोऽसि पद्म ! नुतपद्मज ! पद्मजस्य ।।

५४

+पुंलिङ्गप्रयोगस्य प्रामाणिकत्वेऽपि । अप्रयुक्तत्वदोषो लेखकस्याकवित्वात्क्षन्तव्यः । एवमन्यत्रापि इति लेखकः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राचार्यताकरणपूजनवन्दनाद्यैः
श्रीमन्महेन्द्रकृतसत्कृतिमण्डितो ऽसि ।
षट्शास्त्रनीतीनिगमागमपारगश्च
कस्त्वं गुरो ! सुरगुरोः सुरसार्थपूज्यः ॥

५५

गवाक्षरन्ध्रेण करं प्रसार्य
स्पृष्टास्त्वया नो परकीयदाराः ।
धर्मं श्रितस्य द्विजराजपूज्य !
कथं तुलां ते द्विजराज एतु ॥

५६

स्वकरस्थितरत्नमप्यहो
जहतः क्रीडनवत् कुमारकान् ।
कथमाकलयेद्विदां वरैः
कलनीया भवदीययोग्यता ॥

५७

शब्दब्रह्मणि निष्णातः परब्रह्मविचारकः ।
पद्मप्रसादतुल्यो ऽत्र न भूतो न भविष्यति ॥

५८

रोगाक्रमणम्

नेपालपालविहिते शुभरुद्रयाग-
माचार्यतामुपगतः पुनरेष विद्वान् ।
प्राग्जन्मजातदुरदृष्टवशेन पक्ष-
वातेन घातिततनुर्व्यथितो व्यमुह्यत् ॥

५९

विद्या–सदाचारयमादिदीप्त्या
प्रदीप्तमन्यानभिभूय रोगान् ।
तमभ्ययाद् दुर्दमपक्षवातो
बलाढ्यमभ्येति बलिष्ठ एव ॥

६०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रोगशान्तये तत्काले कृता शिवप्रार्थना

शिव ! शङ्कर ! हे दयानिधे !
भवयागे भवतैव पातितम् ।
तव भक्ततमं विदां वरं
कृपया तारय रोगसागरात् ।।

६१

निरतं निजधर्मपालने
विदधानं जनराजसेवनम् ।
निगमागमपारगं विभो !
कृपया तारय रोगसागरात् ।।

६२

विधिभिः श्रुतिशास्त्रचोदितै-
स्तव यागं विदधानमादरात् ।
नियमस्थितमाश्रवं प्रभो !
कृपया तारय रोगसागरात् ।।

६३

स्वविकर्मविपाकतः स्वयं
पतितोऽपाररुगम्बुधावयम् ।
इति चेत्तदपि त्वमेव हि
त्वदृते नान्यदिहास्ति किंचन ।।

६४

गुरुरप्यहमेवमेव ते
न न शुद्धे मयि दुःखडम्बरम् ।
इति चेच्छिव ! तावकाः समे
न भवेयुर्गुरुदुःखदुःखिताः ।।

६५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथवाऽस्तु विकर्मणः फलं
तदिदं त्वत्कृपयैव नश्यतु ।
करुणां कुरु मे कृपानिधे !
शरणं यामि शरण्य ! तावकम् ।।
६६

इत्थं मुहुर्मुहुरुमेशसभाजनेन
सौवर्णलोचनसमर्पणयाचितेन ।
विद्वद्वरैः सुविहितादुपचारतश्च
संमोहनं व्यपगतं चितिशक्तिरायात् ।।
६७

नेत्राम्बुजे विकसिते स्फुटिता च वाणी
शेषेन्द्रियाण्यपि तथैव यथा पुराऽऽसन् ।
भोगैकनाश्यबलवद्दुरदृष्टहेतो-
र्वामाङ्गमेकमचलं स्थितमस्य कष्टम् ।।
६८

रुग्णावस्था

शिवं प्रति--

सुकृताचरणं क्व निस्तुलं
क्व च सा दुष्कृतजातवातरुक् ।
शिव ! हा किमिदं कृतं त्वया
न हि सूतेऽमृतपादपो विषम् ।।
६९

रोगिणं प्रति--

अयि धर्मसुहृत् त्वयोज्झितं
सुचिरात्स्वेतरपक्वभोजनम् ।
नियमोऽद्य हतोऽयमर्दनात्
अहहा ! धर्मविधिर्गतो भुवः ।।
७०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्यथया हतशक्तिकस्य ते
सुकृतत्यागकृतं न दुष्कृतम् ।
बलिनं कुरुतेऽधिकारिणं
सकलो धर्मविधिर्हि कर्मसु ।

७१

दारिद्र्यम्

पक्षाभिघातेन सुदुःसहेन
प्रपीड्यमानं तमतीव शोच्यम् ।
दारिद्र्यरोगोऽप्यपरोऽभ्ययासीत्
छिद्रेष्वनर्था बहुलीभवन्ति ।।

७२

उपचारविधौ शताधिके
वसु निःशेषतया व्ययीकृतम् ।
न गतं व्यथया न चासुभिः
शिव हा ! विप्रवरो भृशार्दितः ।।

७३

उपचारकृतौ तु न क्षमं
प्रतिमासं शतपञ्चकं धनम् ।
नृपदत्तमिदं ततः कथं
परिवारस्य च पालनं भवेत् ।।

७४

न धनं न बलं न च स्वकाः
सहयोगोऽपि सदा न लभ्यते ।
शयने शयितस्य रोगिणः
पुरतो रोदिति केवलाऽबला ।।

७५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दयनीयदशामिमां जनाः
श्रवणार्हमपि मन्वते न चेत् ।
द्रुतमानससाश्रुलोचनाः
पुनरालोकयितुं क ईशने ॥

७६

उपमारहिता क्व वैदुषो
क्व च निष्किंचनतेयमीदृशी ।
उभयोरितरत्र दुर्लभः
समवायोऽत्र समीक्षितोऽद्भुतम् ॥

७७

यदि तस्य चतुःसहस्रको
न भवेद्राजसहाय आर्थिकः ।
चरमेष्टिविधानमप्यहो
शरणं श्रीरमणस्य संश्रयेत् ॥

७८

धर्षितोऽप्यतिबलेन मृत्युना
नो जहात्यमरभारतीरतिम् ।
शारदादयित इत्यमर्षया
त्यक्त एष किमु पद्मया वत ॥

७९

स्वकार्यदक्षः स्थित एव दक्षे
लक्ष्मीपतेर्हस्त इति प्रमोदात् ।
पद्माप्रसादाप्तिविधौ वितृष्णः
पद्मोऽभवत् किं रमया पदाऽऽहतः ॥

८०

प्राणविसर्जनम्

अर्धाङ्गघातबृहदापदमाप्य तप्तः
सोऽष्टौ समा गजवरामितवासरांश्च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राणानिलं समजहात् पशुपस्य पार्श्वे
भोगं विना न हि विनश्यति पूर्वकर्म ।।

८१

भववाग्भवपुण्यपाथसा
समुपस्पृष्टपदाम्बुजद्वयः ।
प्रियरामपदोक्तिसंस्फुर-
न्मुखपद्मः ससुखं दिवं गतः ।।

८२

निजदक्षिणकर्णमूर्ध्वतो
विदधानाय मुमुक्षुधीमते ।
प्रददौ किल तारकं मनुं
पशुपः प्राणविसर्जनक्षणे ।।

८३

स्मरणादपि वाञ्छितप्रदं
परमब्रह्मसमानमन्तिमे ।
श्रुतरामपदं समुच्चर-
न्नगमद्ब्रह्मपदं स निश्चितम् ।

८४

अशनं परिहाय दुःस्थितं
स्फुटवाणी व्यजहाद् भृशार्दितम् ।
असुवच्चरमक्षणेऽपि तं
न तु चैतन्यममुञ्चदिङ्गितम् ।।

८५

मरणं स्पृहणीयमीदृशं
न लभेरन् यतयोऽपि कर्हिचित् ।
स तु धर्मधुरन्धरो महाँ-
स्तदवापन्मुहुरात्मचिन्तकः ।।

८६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धातारं प्रति–

प्रिययोषिति दारकैः समं
विलपन्त्यां करुणं शुचाऽनिशम्
नयसे दयितं दिवं बला–
दयि धातस्त्वमतीव निर्दयः ॥

८७

दिवंगतं प्रति–

अतिदुर्भरभारजीवनं
जहतस्ते सुखमेव भो गुरो ! ।
भवदाननदृष्टिजीवनो
वद वर्तेत कथं भवज्जनः ॥

८८

व्यलपत् परदुःखदर्शना–
दपि यो वाष्पविमोकमत्रपः ।
रुदतः स्वजनान् पुरोऽदितान्
स भवानद्य कुतो न वक्त्यपि ॥

८९

तनयाद्वितयं चतुःसुतान्
अकृतोद्वाहविधीन् विहाय तान् ।
करुणारहितो जनो यथा
क्व गतस्त्वं बुधवर्य साम्प्रतम् ॥

९०

विषमस्थलमर्मभेदनै–
रयुतग्रन्थियुधां विमर्दकः ।
नयपालसुधीमहारथ !
क्व गतस्त्वं सशुचो विधाय नः ॥

९१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विदुषां वर बुद्धिजीविभिः
समवेतै रचितासु कार्यतः ।
अभिधास्यति कः सुनिर्णयं
वद वादादिकथा स्वतः परम् ।।

६२

शयने शयितोऽपि पीडना-
दनुयोगान् विविधान् समादधत् ।
अयि पण्डितवृन्दमण्डित !
क्व गतोऽस्यद्य विहाय पण्डितान् ।।

६३

विधुरोऽप्युरुवेदनाभरा-
दुपधानादिसहायतो भवान् ।
गुरु-शिष्यगणानपाठयत्
क इदानीं विदधीत तद्वद ।।

६४

व्यथितोऽपि विधाय कर्मठ !
प्रचुरं कर्म परीक्षणादिषु ।
स्वजनान् भृतवानसि श्रमै-
र्वद कस्तानधुना भरिष्यति ।।

६५

कथयाद्य कथं करिष्यते
दयिता तेऽबुधबालपालनम् ।
अथवा नृपवीरशासने
प्रभवेयुर्न बुभुक्षितारयः ।

९६

रुचिरा सुचिरादुपासिता
सुविचारा दयिता गुरो ! तव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भवता सह सा दिवं गता
सरसाऽध्यापनरीतिरप्यहो ॥

९७

नय मामपि बोधनार्थिनं
त्वदृते नान्यमहं वृण गुरुम् ।
परिहाय बलाहकोदकं
न पिबत्यन्यजलं हि चातकः ॥

९८

आचार्यपाद ! भवदीयपदारविन्द-
माराध्य हर्षनिवहो हृदये प्ररूढः ।
येनान्वभावि सततं कथयाऽधुनाऽस्य
शोकाकुले मनसि धैर्यधृतिः कथं स्यात् ॥

९९

यद्देशमृत्तोयसमुद्भवः प्राक्
तत्रैव लीनोऽभवदस्य देहः ।
विकारजातं हि निजप्रकृत्यां
विलीयतेऽसौ प्रकृतिस्वभावः ॥

१००

विदां वर ! सुरालयं प्रति गतस्य ते भूतले
स्पृहाविषयतां गतं किमपि नो तथाऽपि प्रभो ! ।
भवद्गुरु-कृपालताप्रभवपद्यपुष्पादिभिः
कृतोऽयमुपगृह्यतां करुणयाञ्जलिः श्रद्धया ॥

१०१

वागर्थरत्नाकर ! तुभ्यमञ्जलि-
र्निरर्थवाचा विहितो विगर्हितः ।
तथाऽपि बद्धं गुरुभक्तिरज्जुभि-
र्मनो मदीयं न ततो न्यवर्तत ॥

१०२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रद्धाभक्तिसनाथेन लोकनाथेन निर्मितः ।
गुरु–वृत्तदिशो वर्त्म दर्शयत्वयमञ्जलिः ।।

१०३

पदार्थाशुद्ध्यसिद्ध्यादिनानादोषाकरोऽप्ययम् ।
दृश्यतामञ्जलिर्विज्ञा ! वर्णनीयगुणाऽकरः ।।

१०४

वैशेषिकोऽहं कविपूर्वजन्मा
नालोकयं लोकविलोकनीयान् ।
सलज्जसाहित्यवधूकचाँश्च
कृतिः कथं स्याद्रुचिराऽकृतिर्मे ।।

१०५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रद्धा-प्रसूनम्

प्रा. विष्णुराजशर्मा आत्रेयः

भव्यो देहो भासुरः कीर्तिराशि–
र्विद्वद्भास्वान् भट्टराईत्युपाह्वः।
स्वर्गं यातोऽस्मान् विधायैव दीनान्
स्मारं स्मारं दूयतेऽद्यापि चेतः ।।
।।१।।

ग्राम्यो बालोऽयं महीध्राऽधिवासी
गोपैः सार्धं चारयन् कानने गाः ।
पश्चाज्जातस्सैव विद्वद्वरेण्यः
पद्मोत्पत्तिः कर्दमादेव चित्रम् ।।
।।२।।

धर्मं न्यायश्चाथ वेदान्तशास्त्र–
मध्याप्यान्तेवासिनः पाणिनीयम् ।
वाराणस्यां ख्यातनामा हि विद्वान्
स्वीयं देशं भारतादाजगाम ।।
।।३।।

विद्यासिन्धुं न्यायवेदान्तपार–
दृश्वानं श्रीयुक्तपद्मप्रसादम् ।
ज्ञात्वा ऽऽयातं पण्डिता देववाण्याः
सर्वेऽत्रत्या जातहर्षा बभूवुः ।
।।४।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काले याते श्रीमहेन्द्रेण राज्ञा
रौद्रो यागोऽनुष्ठितो राजधान्याम् ।
विद्वन्मूर्धन्यो वरेण्यस्तदानी-
माचार्यत्वं प्रार्थितः स्वीचकार ॥
॥५॥

तस्मिन् विद्वन्मण्डलीमण्डलोऽयम्
भस्मोच्छूनस्त्र्यम्बकध्यानलग्नः ।
कुर्वन् मन्त्रोच्चारणं सूरिवर्यः
पक्षाघातक्लेशितो यागभूमौ ॥
॥६॥

भूभृन्मान्यः शास्त्रचिन्तैकलक्ष्यो
जिज्ञासूनान्तत्क्षणं छिन्नशङ्कः ।
पूताचारोऽप्यत्र रुग्णः कथन्नु
को जानीयादैश्वरं कामचारम् ॥
॥७॥

यावज्जीवं शास्त्रचिन्तां विधाय
यावज्जीवन्नित्यमध्याप्य शिष्यान् ।
यावज्जीवन्तोषयित्वाऽऽशुतोषम्
मुक्तिं लेभे तारकोच्चारणेन ॥
॥८॥

नित्यो ह्यात्मा मृच्छरीरन्त्वनित्यम्
कालेनेदं जायते नश्यतीति ।
ज्ञानं भूयाच्छोकमूलं विनश्यात्
तद्बन्धूनामीश्वरं प्रार्थयामि ॥
॥९॥

पद्मप्रसादनामानम्भट्टराईत्युपाभिधम् ।
उद्दिश्य श्रद्धाकुसुमं विष्णुराजः समार्पयत् ॥
॥१०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रद्धाञ्जलिः

प्रा. विश्वनाथः पोखरेलः
वाल्मीकि क्याम्पस

प्राच्यां पर्वतखण्डमण्डनमही तस्यां स पद्माऽभिधो
लेभे जन्म पुरा गिरेरिव रविः स्वात्मप्रकाशोज्ज्वलः ।
कालं स्वल्पमतीत्य तत्र च गुरोरध्येतुकामः स्वयं
संप्राप्तो नयपालमूलनगरीं भेजेऽचिरं भारतीम् ।।

१

मेधेत्यादि समस्तसुन्दरगुणान् चिन्वन्बुधः प्रत्यहं
छात्राणां निकटे स तारकगणे रेजे सुधांशुर्यथा ।
दातुं व्याकरणस्य तादृशसुधीःकाशीं ययौ मध्यमां
छात्राणां प्रचयेषु सर्वप्रथमो भूत्वा स भेजे शिवम् ।।

२

न्यायेऽसौ प्रथमोऽभवत्किल गुणी संप्राप्य शैवीं कृपां
काश्यां ख्यातगुणोऽभवद् बुधकुले ज्योतिश्च लेभे परम् ।
नेपाले भरतावनौ च विमलां कीर्तिं वितेने शुभां
सोऽस्मानद्य विहाय नाकमगमद्दीना वियुक्ता वयम् ।।

३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परिदेवनवेदनम्

प्रा. शेषराजशर्मा
वाल्मीकि क्याम्पस

नियते ! तव कीदृशी कृति-
गलिता हन्त ! यया सतां धृतिः ।
तव कर्कशता ऽप्यतर्किता
प्रतिपाद्या हृदयालुभिः कथम् ॥
१

उदरम्भरिता ऽर्थलुब्धता
वितता पञ्चशरीशरव्यता ।
सुलभा सुकृते ऽप्युपेक्षिता
विकराले कलिकालके ऽधुना ॥
२

अनुभूय मुहुर्मुहुर्व्यथा-
मनपेक्ष्यैव निजा ऽर्थमत्र ये ।
विदधत्युपदेशदेशनां
विरलास्ते परदेशिका भुवि ॥
३

नियते तव दुष्टता कथं
पतिता तादृशसज्जने ऽपि हा !
अनभीप्सितदृश्यदर्शनाद्-
धृदयं येन विदीर्यते वत ॥
४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नित्यं सदाचरणपूततनुर्गुणज्ञः
सच्छास्त्रसंस्कृतमतिः प्रतिभासनाथः ।
पद्मप्रसादविबुधः सुकृती पराप्तो
हा हन्त हन्त ! सहसा सुरभूयमाप्तः ॥
५

प्राचीनेऽथ नवीनकेऽतिवितते न्यायद्वये यः कृती
श्रीमद्गौतमवत्तथैव मतिमद्गङ्गेशतुल्योऽभवत् ।
यः सांख्ये द्विविधेऽप्यकुण्ठितमतिः संख्यावतामग्रणी-
र्मीमांसाद्वितयेऽपि गाहनपटुः पद्मप्रसादोऽभवत् ॥
६

यश्चार्वाकनये तथागतमते ख्यातेऽथ जैनागमे
साहित्येऽनुपमो विचक्षणतमो मन्वादिकायां स्मृतौ ।
यः शास्त्रीयसमस्ततत्त्वविषये प्रामाणिकत्वं गतः
शिक्षाद्यन्वितवेदवेदनपटुः पद्मप्रसादोऽभवत् ॥
७

तन्त्रे व्याकरणे प्रभेदसहिते, धर्मव्यवस्थापने
छात्राऽध्यापनकौशले निशितधीर्योऽभूत्सुधीसम्मतः ।
विद्यामन्दिरशिक्षकाग्रपदभाग् ज्ञानक्रियाऽलङ्कृतो
वाग्देवीपरमप्रसादमहितः पद्मप्रसादोऽभवत् ॥
८

अयि पूज्यकृतिन् स्वनुष्ठितं
निजमध्यापनकं विहाय हा !
कथमद्य दिवं गतो भवा-
ञ्जनिभाजा क्षणिकत्वमत्र धिक् ॥
९

परिदेवनवेदनं कृतं
पविपातोपमवेदना कृतम् ।
भवता गुणगृध्नुनाऽधुना
मम भक्त्यञ्जलिरेष गृह्यताम् ॥
१०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रद्धाञ्जलिः

प्रा. सिद्धिनाथ गौतमः
वाल्मीकि क्याम्पस

नेपालभूषणविशिष्टविशालविद्वन्,
शास्त्रार्णवातिगहनान्त्यतलावगाहिन् ।
आत्माभिमानगुणदीपसुदीप्तमूर्त्ते
हास्मान् विहाय नु गतोऽसि गुरोऽधुना त्वम् ॥
॥१॥

पद्मोदयं ह्येकविधं करोति
दिवाकरो व्योमगतः प्रभाते ।
पद्मोदयं त्वन्यविधं हिमांशुः
सूर्योऽपि तावत् कुरुतः स्म चित्रम् ॥
॥२॥

पद्मोदयं वाञ्छति भार्गवीच्छुकः
पद्मोदयं काङ्क्षति भारतीच्छुकः ।
प्राप्तः समानाश्रयतां तयोर्द्वयो-
रासीत्स पद्मोदय आः किमद्भुतम् ॥
॥३॥

श्रुतिमतिपरिपूतः कान्तिकान्तोऽतिदान्तः
नयविनयविलासी शुद्धसत्कर्मशक्तः ।
यमनियमसुशीलः शारदाभक्तिसक्तः
परिहरति समेषामेष बोधान्तरायम्
॥४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शास्त्राभिप्रायसाधूकरणपटुतरख्यातविद्वद्वरेण्यः
संख्यासामर्थ्यभाजामपि दृढमनिशं यः प्रभावानभिज्ञः ।
निस्पक्षः स्वाभिमानी गुणिगणगणनापूर्वगण्यः समर्थः
पद्माक्षस्यापि साम्यं वहति दृढतरं पद्मपूर्वः प्रसादः ।।

।।५।।

न रत्नमन्विष्यति मृग्यते हि तत्
महाकवेः सूक्तिरियं प्रवर्तिता ।
पुरा प्रधानोपपदं सुशोभितुं
सुपद्मरत्नं परिमृग्य कोविदैः ।।

।।६।।

शब्दज्योतिःप्रसारे दिनकर इव यो गाढमोहान्धकारे
विद्यावंशप्रचारे जनक इव सदा शिष्यवर्गे ह्यपारे ।
ज्ञानज्योत्स्नाप्रदाने विधुरिव सुचिरं स्निग्धविद्वच्चकोरे
सोऽयं पद्मप्रसादः सकलबुधनुतो राजते कीर्तिशेषः ।।

।।७।।

प्रगाढपाण्डित्यविभूषितोऽपि
साधारणत्वं व्यवहारजन्यम् ।
बिर्भात यो ज्ञानमयो महात्मा
धुरन्धरः संस्कृतविष्टपस्य ।।

।।८।।

जगत्प्रतिष्ठा–स्थितिहेतु–धर्म–
प्रस्थापना–सृष्टिविधेर्विधाता ।
सत्साधना–त्याग–प्रदान–माना–
वष्टम्भमूर्तिः सुतरां रराज ।।

।।९।।

भवन्ति सर्वे मनुजाः प्रयासात्
श्रेष्ठत्वमाप्ता इति सन्दिशन् यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वर्गे सुराचार्यसमानमान
आचार्य आसीदिह भूसुराणाम् ।।
।।१०।।

नटीव या मोदमुपागता पुरा
तवाश्रयान् नृत्यति सर्वतः सदा ।
तथाविधा त्वद्विरहातिदुःखिता
सुसंस्कृता हन्त ! हता सरस्वती ।।
।।११।।

कठिनस्थलपङ्क्तिस्थमर्मस्फोटनपण्डितः ।
पदवाक्यप्रमाणादिशास्त्रसागरपारगः।।
समध्याप्य चिरं शिष्याननेकांश्च बुधान् विभुः ।
विधाय बुधपुत्रैकाच्चन्द्राद्वैशिष्टचमागतः ।।
।।१२-१३।।

नव्यन्यायगभीरताहितमतिः शास्त्राधिकारी महान्
यावत् पङ्क्तिपदार्थभेदनविधौ लग्नः प्रवीणःसुधीः ।
आचार्यादिविभिन्नशिष्यनिकर–प्राध्यापने तोषभाग्
विद्वद्वृन्दविचारसंशयपरावृत्तावभूद्यो ऽसमः ।।
।।१४।।

विद्यालयस्य प्रथितस्य योग्यं
प्राचार्यसंज्ञं स्पृहणीयरूपम् ।
डीनाभिधानादि पदं च सम्यग्
विभूषयामास विदां वरो ऽसौ ।।
।।१५।।

पद्मा पद्माकरस्थं सा पद्मं वासाऽर्थमिच्छति ।
पद्माकरादनुत्पन्नं पद्मं नेच्छति हन्त ! सा ।।
।।१६।।

पद्मालया तिष्ठति पद्मसद्मनि
पद्मालया मुञ्चति पद्मसद्म नु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पद्मस्थवाण्यां तु सपत्नभावजो
नासीत्सकोपस्तदपीयमीर्ष्यति ।।

।।१७।।

क्षेत्रे पाशुपताभिधे ऽतिमहिते घट्टं तमार्याभिधं
प्राप्यान्ते विधिधर्मकर्मप्रयतः सोमं शिवं संस्मरन् ।
भार्यापुत्रसुबान्धवादिषु पुनः सद्धर्मतां ज्ञापयन्
रुग्णं जीर्णमथो विहाय च वपुः सायुज्यमापद्विभोः ।।

।।१८।।

एषां समेषां च महागुणानां
रत्नाकरस्येव गुरोरभावम् ।
दृष्ट्वातिखिन्नो गुरुभक्तिपूर्णः
श्रद्धाञ्जलिं सादरमातनोति ।।

।।१९।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विद्वत्स्मृतिः

स्व. प्रा. हरिनाथ उपाध्याय ढुङ्गेलः
वाल्मीकि क्याम्पस

षट्शास्त्रदर्शनमहोदधिमन्थनाद्रि-
स्तेषां प्रशिक्षणविधिष्वपि यो ऽ द्वितीयः ।
प्राप्तप्रतिष्ठितपदाञ्चितपादपद्मो
नेपालभारतसरःसु विभाति पद्मः ॥
१

युञ्जानयोगी खलु पद्मसूरि–
र्ध्यात्वा क्षणं दुष्फुटशास्त्रपंक्तेः ।
व्याख्याति तत्त्वं स्म यथार्थमेव
विद्वत्सु तस्यैष गुणो विशिष्टः ॥
२

प्राज्ञेषु काश्यां स प्रसिद्धिमाप
विशेषतस्तार्किक–कोविदेषु ।
गभीरविद्वत्त्वममुष्य वीक्ष्य
सर्वे बुधा विस्मयमावहन्ते ॥
३

आवाहिता या कलशेषु कोविदै–
र्गुप्ताकृतिस्तत्र विरक्तमानसा ।
निर्वास्य लक्ष्मीं ननु नीलशारदा
पद्मे स्थिता ऽऽकारगभीरमुद्रया ॥
४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विजेतुकामो महतोऽपि तार्किकान्
विस्मापयन् स क्षणशोऽध्यजीगपत् ।
यदीयशिष्या अभितोऽपि भारतं
लब्धप्रतिष्ठाः कतिशश्चकासति ॥

५

पुरैवमुक्तावलितर्कदीपिका
व्युत्पत्तिवादः कुसुमाञ्जलिस्ततः ।
अद्वैतसिद्धेर्लघुचन्द्रिकाभिधा
भूयोऽप्यपाठीह मया हि यस्मात् ॥

६

आकारतुल्या खलु यस्य शेमुषी
तत्सन्निभोऽशोभत यः सदागमः ।
दिवं गतो हन्त ! स पद्मपण्डितो
निराश्रया रोदिति सा सरस्वती ॥

७

पशुपतिं प्रति

कृपया पशुपेश ! तेऽहहा ! ! !
चिरकालादतिकष्टरोगिणः ।
भविता भवतापशान्तये
मरणं त्वच्चरणारविन्दयोः ॥

८

तव रुद्र ! प्रकोपशान्तये
विधिवद्यज्ञविधानमाचरन् ।
सहसा स पिनाकलक्ष्यतां
गमितो दार्शनिको नृकेशरी ॥

९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

करुणारहितं कथं प्रभो !
हृदयं तत्र प्रदर्शितं त्वया ।
शरणे मरणं विलोक्य ते
यजनाद् बिभ्यति हन्त सूरयः ।।
१०

प्रमथा अपि ते विनाज्ञया
न हि कुत्रापि प्रहर्तुमीशते ।
प्रमथेश ! तवैव विक्रमाद्
द्विजराजो निहतो निजाश्रितः ।।
११

कतिशस्तव प्रार्थनाः कृता
उपचाराश्च सहस्रशस्तथा ।
सकला विफलास्तदाऽभवन्
प्रतिकूले हि विधौ क्व सिद्धयः ।।
१२

गुरुं प्रति

तव लोहमयीव या तनु-
र्बहुधा द्वन्द्वसहा व्यलोच्यत ।
अधुना विधिना रुजाऽऽतुरा
वत ! शय्यां भजतेऽतिदुःखिता ।।
१३

अहहाष्टसमाः कथञ्चन
व्यतियाता भवतोऽतिकष्टतः ।
ननु पावकदग्धकाञ्चन
इव शुद्धोऽस्ति निरञ्जनो भवान् ।।
१४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भवतो मयि या कृपा गुरो,
स्मरतो मे हृदयं प्रहृष्यति ।
अधुना विमुखं विधिं स्मरत्
सहसा तच्छतधा विदीर्यते ।।

१५

परिभुक्तमिहैव प्राक्तनं,
परलोकाय न शिष्टमस्ति तत् ।
अथ सच्चिदनन्तरूपिणा
परमानन्दरसो ऽनुभूयताम् ।।

१६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पद्मस्मृतिः

योगी नरहरिनाथः

पद्मप्रसादविदुषा विदुषाम्प्रियेण
पद्माप्रसादरहितेन हितेन पुंसाम् ।
पद्मासनस्य पदपद्मसमाश्रितेन
पद्माप्रियस्य पदवी चिरमाश्रिता हि ॥
१

रुद्रक्रतौ कृतिषु मुख्यतया वृतोऽसौ
रुद्रालये सकलरुद्रविनिद्रमुद्रे ।
रुद्रेषु भद्रचरितेषु समर्च्चितेषु
रौद्रेण रोगभुजगेन धृतो हि पद्मः ॥
२

यागे महेन्द्रनृपतेर्हितकारिणीद्धे
त्यागे प्रभूतधनधान्यधरादिकानाम् ।
रागे समग्रजनमानसबद्धमूले
रोगेण राहुसदृशेन धृतो हि पद्मः ॥
३

निष्पक्षवाचि विदुषीदृशि पक्षघातं
वीक्ष्याक्षपादगिरि गौरवमादधाने ।
दीक्षाक्षमा अपि समे गतपक्षपाता
धातारमेव विबुधा धिगिति व्यरुन्धन् ॥
४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दीना द्विलक्षधरणी धरणीधरोऽयं
दीनोऽपि दीनमनसः सुमनःसमूहाः ।
दीनाः समस्तपरिवारजना वियोगात्
पद्मप्रसादविदुषः पुरुषार्थहीनाः ॥

५

काशी प्रकाशरहिता विदुषां व्रजेऽपि
कान्तिश्च कान्तिरहिता विबुधेषु सत्सु ।
वाल्मीकिसद्म तव पद्म ! वियोगदुःखैः
खिन्नं खिलीकृतपुराणमतं विपन्नम् ॥

६

पद्मादृता मधुकरा नितरां रुदन्ति
पद्मार्च्चिताः सुरगणाः सुतरां विषण्णाः ।
पद्मोदये मुकुलिता विहसन्त्यसन्तः
पद्मालये सकलमाकुलमद्य हन्त ! ॥

७

नेपाल ! पालयसि ? पद्मपथं प्रशस्तं
संस्कारपूतहृदयेन दयामयेन ।
विश्व ! स्वधर्मरतमा ! स्मरसीह पद्मं
विद्यालयाः ! स्मरथ ? तं त्वनवद्यविद्यम् ॥

८

आध्यात्मिकी परिषदप्यतिखिन्नचित्ता
वेदाश्रमः श्रयति खेदमपेतपद्मः ।
सीदन्ति सन्त इदमाकलयन्त एते
तत् संस्कृतं परिहृतं तव पद्म ! पूज्यम् ॥

९

अष्टौ समाः समधिका दृढपक्षघात
आर्त्तः शयान उपधान इदं विनिन्द्य ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शाके शराङ्कगजचन्द्रमिते स पद्मः
कैलासवासमकरोत् पशुपत्युपेतः ।।
१०

लक्ष्मीप्रसादकविना कविनायकेन
पद्मप्रसादविदुषा विदुषांवरेण ।
कष्टेन कालभुजगस्य मुखे प्रविष्ट–
मित्थं जनस्य मरणं न कृथाः कृपालो ! ।।
११

विरचिता बटवः पटवस्त्वया
सुविहितो निगमागमसङ्गमः ।
पशुपतेः पदयोर्हुतमावपु–
र्नरहरेरहरेवमगाद् वृथा ।।
१२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शाके शराङ्कगजचन्द्रमिते स पद्मः
कैलासवासमकरोत् पशुपत्युपेतः ।।
१०

लक्ष्मीप्रसादकविना कविनायकेन
पद्मप्रसादविदुषा विदुषांवरेण ।
कष्टेन कालभुजगस्य मुखे प्रविष्ट–
मित्थं जनस्य मरणं न कृथाः कृपालो ! ।।
११

विरचिता वटवः पटवस्त्वया
सुविहितो निगमागमसङ्गमः ।
पशुपतेः पदयोर्हुतमावपु–
र्नरहरेरहरेवमगाद् वृथा ।।
१२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu